A.C. Joshi Library
P.U. Chandigarh

MSS No. 370 L Subject Religion

Name of MSS श्रीमद् भागवत ; भावार्थ दीपिका सहित

Author

Period Folios 51

Script Devnagri Source Prithipal Singh

Missing Folios

Canto 12

3702   51

12

भा.द्वा.
टी.
१

ॐश्रीगणेशायनमः ॐजयतिश्रीपद्मनाभःकृपापांगालसदृशः यःनित्यमनुवर्त्तेतेसपदोविगनादृशः १ उक्त
स्कंधयोर्द्वादश्योर्द्दशोल्लासद्वयः मतः अधिष्ठानावधित्वाभ्यामाश्रयश्रेष्ठरःमतः २ उक्तौलयावधित्वेनया
कृतान्यनिकेलये अधिष्ठाननत्याचोक्तामहापुरुषवर्णने ३ तत्रादौषड्भिरध्यायैःशुकआहपरीक्षितं
दोषमस्याखिलान्याहस्मृतःषष्ठार्थसमासिः ४ स्वाश्रयस्यवर्णाकार्यानविर्लवोमनीषिणां इत्येषकालवै
षम्यचननिर्मिलावतुच्यते तत्रतत्प्रथमेसाविमागधान्वयभूमिपान् कलिप्रभावतःप्राहमकरादिमलीम
सान ६ एवंभूतेसोमवंशेसमुत्कृदसेरक्रीडावर्णितव्यासतएवंवंशोभावीवर्ण्यते कृष्णभक्तिमुक्तामुक्तैव
स्वैनासीतिवक्तम् तदेवैवस्वतमनुवंशो सोमवंशप्रसावेनश्रीकृष्णावतारचरितानिसप्रपंचमनुव
र्णितानि अथेदानीभाविसोमवंशकलौविज्ञानीयसंकरादिमलीमसोवैराग्यहृाराश्रीकृष्णेसकभक्ति
निगमनायानुवर्ण्यते तत्रेनसोमवंशशाखास्वचिरकालानुवर्त्तितयामागधवंशानुक्रम्यते तत्रत्रा
दशौवंशौउपचरोवसुतस्यपुत्रबृहद्रथस्तस्यजरासंधस्तस्यसहदेवःपुत्राभूदित्युक्तेनवमस्कंधे तेत्रैवसह
देवान्मार्जारिस्ततःश्रुतश्रवाः इत्यादयोरिपुंजयांताविंशतिर्भोवि
नोराजानोनिरूपिताः २॥०

तदुपचरितमेतं वंशोसं कलादिदोषैः प्रपेच्यपति योन्त्यइति रिपुंजयएवपुरंजयः स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्र
योतं राजानं करिष्यति १ यस्य पालको नाम सुतो भविष्यति ३ प्रद्योतनाः प्रद्योतसुताः ३ ४ ५ ० नं
राजोवाच स्वधामानुगते कृष्णे यदुवंशविभूषणे कस्य वंशोभवत्पृथ्व्यामेतदाचक्ष्व मे मुने १ शु
क उवाच योन्त्यः पुरंजयो नाम भविष्यो वैहद्रथः तस्यामात्यस्तु शुनको हत्वास्वामिनमात्मजे
१ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ३ नंदिव
र्द्धनस्तत्पुत्रः पंचप्रद्योतना इमे अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृप ४ शिशुनागस्ततो भा
व्यः काकवर्णस्तु तत्सुतः हेमधर्मा तस्य सुतः हेत्रज्ञः हेमधर्मजः ५ विधिसारः सुतस्तस्याजात
शत्रुर्भविष्यति दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ६ नंदिवर्द्धन आजेयो महानंदि
सुतस्ततः शिशुनागा दशैवैते षष्ठ्युत्तरशतत्रयं ७ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः
महानंदिसुतो राजन् शूद्रागर्भोद्भवो बली ८ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ततो
नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ९ स एकछत्रां पृथिवीमनुल्लंघितशासनः शासिष्यति
महापद्मो द्वितीय इव भार्गवः १०
दो नाम कश्चिन्महापद्मसंख्यायाः सेनायाः धनस्य वा पतिर्भविष्य
ति अतएव महापद्म इत्यपि तस्य नंदस्यापरं नाम ८ एकमेवछत्रं यस्यां तां पृथिवीं शासिष्यति पालयि

छपति तत्कोसारेद्वंहेताः मार्गवपरशुरामवत् १

भा. द्वा. टी. २ समाःसंवत्सरान् १० नवनंदान्नंदंचतत्पुत्रांश्चेत्येवंनवप्रपन्नान्विश्वस्तान्विख्यातान्वाद्विजःकौटिल्यवा
त्स्यायनादिपर्यायश्चाणक्यउद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यसंज्ञाः ११ कथंभोक्ष्यंति तदाह स
एवेति चंद्रगुप्तंमौर्यप्रथमं १२ १३ तेषांप्रथमोदशरथःपराशरादिभिरुक्तो नाप्यत्रसंदेहस्तेनसहदशमौ

तस्यचाष्टौभविष्यंतिसुमाल्यप्रमुखाःसुताः यइमांभोक्ष्यंतिमहींराजानःस्मशतंसमाः १० नवनंदा
न्द्विजःकश्चित्प्रपन्नानुद्धरिष्यति तेषामभावेपृथिवींमौर्याभोक्ष्यंतिवैकलौ ११ सएवचंद्रगुप्तंवै।
द्विजोराज्येभिषेक्ष्यति तत्सुतोवारिसारस्तुततश्चाशोकवर्द्धनः १२ सुयशोभवितातस्यसंगतःसु
यशाःसुतः शालिशूकस्ततस्तस्यसोमशर्माभविष्यति १३ शतधन्वाततस्तस्यभवितातद्बृहद्रथः
मौर्याह्येतेदशनृपाःसप्तत्रिंशच्छतोत्तरं १४ समाभोक्ष्यंतिपृथिवींकलौकुलोद्वह अग्निमि। रुकु
त्रस्ततस्तस्मात्सुज्येष्ठोभविताततः १५ वसुमित्रोभद्रकश्चपुलिंदोभविताततः ततोघोषःसुत
स्तस्माद्वज्रमित्रोभविष्यति १६ ततोभागवतस्तस्माद्देवभूतिःकुरूद्वह शुंगाद्दशैतेभोक्ष्यंतिभू

र्यादश सप्तत्रिंशत्शतोत्तरं सप्तत्रिंशदुत्तरंशतंसमाः १४ बृहद्रथस्य मिवर्षशताधिकं १७
सेनापतिः पुष्पमित्रोनामस्वामिनंहत्वाराज्यंकरिष्यति १५ सचशुंगानांप्रथमः ततोग्निमित्रादयोन २
वेत्येवंशुंगादशवर्षशताधिकं वर्षशतं १७ ॥ ० ॥

कश्चेकण्वान्यास्यतिनिदार शुंगमिति परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा।
काण्वोराज्यंकरिष्यति १९ काण्वानां चतुर्णां सुशर्मान्तमेवं वसुदेवादयः काण्वायनः वर्षाणांत्रीणिशतान।
ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप १७ शुंगं हत्वा देवभूतिं काण्वोमात्यस्तु कामिनं स्व
यं करिष्यते राजन् वसुदेवो महामतिः १८ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः काण्वाय।
ना इमे भूमिं चत्वारिंशच्च पंच च १९ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे हत्वा काण्वं सुश
र्माणं तद्भृत्यो वृषलो बली गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः २० कृष्णनामाथ तद्भ्राता।
भविता पृथिवीपतिः श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः २१ लंबोदरस्तु तत्पुत्रस्तस्मा
च्चिबिलको नृपः मेघस्वातिश्चिबिलकादटमानस्तु तत्सुतः २२ अनिष्टकर्मा हालेयस्तलकस्त
स्य चात्मजः पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः २३ चकोरो बहवो यत्र शिवस्वातिररिंद
मः तस्यापि गोमती पुत्रः पुरीमान्भविता ततः २४ मेदःशिराः शिवस्कंदो यज्ञश्रीस्तत्सुतस्ततः
विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः २५ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च षट्
पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन २६
निपंच चत्वारिंशाद्वर्षाणि च भूमिं भोक्ष्यंति १९ क
एवोनामनि मसरामीणां हत्वा बलिहिकनामनद्भृत्यो गां भोक्ष्यति २०-२२ पंचयेषु वक्ष्यंते तेषु प्रस्तनवमः।

3

भा० द्वा० आवभृत्याः श्रावभृतिर्नगरीतन्नाजानः २० २१ एतेत्राभीरादयोमौनवानिरिक्ताः पंचषष्टिनृपाएकोनशता

टी० धिकंवर्षसहस्रं पृथिवींभोक्ष्यंति ततः श्वेतकाएवैकादशमौनाः त्रीण्यब्दशतानिदितिंभोक्ष्यंति तैःसंस्थि

३ तेषुमौनेषुमृतेषु किलिकिलायांपुर्यांनृपतयोभविष्यंतीत्युत्तरेणान्वयः २६ अधिकानिचषट्वर्षाणि १

सप्ताभीराआवभृत्यादशगर्दभिनोनृपाः कंकाःषोडशभूपालाभविष्यंतिचलोलुपाः २७ ततोष्टौ
यवनाभाव्याचतुर्दशतुरुष्ककाः भूयोदशगुरुंडाश्चमौनाएकादशैवतु २८ एतेभोक्ष्यंतिपृथि
वींदशवर्षशतानिच नवाधिकांचनवतिंमौनाएकादशक्षितिं २९ भोक्ष्यंत्यब्दशतान्यंगत्रीणि।
तैःसंस्थितेततः किलिकिलायांनृपतयोभूतनंदोथवंगिरिः ३० शिशुनंदिश्चतद्भ्राताय।
शोनंदिःप्रवीरकः इत्येतेवैवर्षशतंभविष्यंत्यधिकानिषट् ३१ तेषांत्रयोदशसुताभवितारश्च
बाह्लिकाः पुष्पमित्रोथराजन्योदुर्मित्रोस्यतथैवच ३२ एककालइमेभूपाःसप्तांध्राःसप्तकौश।
लाः वैदूरपतयोभाव्यानैषधास्ततएवहि ३३ ॥

तेषांभूतनंदादीनांपर्यायपर्यंतंबाह्लीकास्तन्नामानस्त्रयोदशसुताभविष्यंति अथपुष्पमित्रोनामान्योराज
न्यः अस्यचदुर्मित्रोनामपुत्रः ३२ तथासप्तांध्राःकौशलाःवैदूरपतयः निषधाश्च एतेततद्देशनामभिः ३
प्रख्यातानानाकुलाः खंडमंडलेषुभूपाः ततएवतेभ्योबाह्लिकेभ्यएवभाव्याभविष्यंति ३३ ॥ ०

3A

ततश्च मागधानां च राजा विश्वस्फूर्जिनाम च पूर्वोक्तात्पुरंजयात्परः पुरंजय इति प्रसिद्धः स तु वर्णान् ब्राह्मणादीन्
पुलिंदयदुमद्रसंज्ञातान् म्लेच्छप्रायान्करिष्यति अपराणीति पाठे अन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्य-
र्थः ३५ स च एवं कृत्वा अब्रह्मभूयिष्ठाः ब्रह्मतानं अध्ययवाब्रह्मवेदं वेदराहित्यं अत्रैवर्णिकप्रचुरा अप्रसक्ताः प्र-
जाः स्थापयिष्यति पालयिष्यति स च पद्मावत्यां पुरि अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां रक्षितां पालि-

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् ३६ प्रजाश्चाब्रह्म-
भूयिष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवान्क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि ३७ अनुगंगामाप्रयागं गु-
प्तां भोक्ष्यति मेदिनीं सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः व्रात्या द्विजा भविष्यंति शूद्रप्राया जना-
धिपाः ३८ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्च-
सः ३९ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ४०
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः उदितास्तमितप्राया अल्पसत्वाल्पकायु-

तां मेदिनीं भोक्ष्यति
३७ तटं तीरं च सौराष्ट्रादिदेशावर्तिनो द्विजा व्रात्या उपनयनरहिता भविष्यंति ३८ अब्रह्मवर्चसः वेदाचारशून्याः
४० इमे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति किं च एते सर्वे अधर्मानृतपराः अधर्मश्चानृतं च परे निष्ठिताः
फल्गुदाः अल्पदाः अल्पदातारः ४१ उदितास्तमितप्रायाः हर्षशोकादिव्याकुलाः ४२ ॥ ०

4

भा० द्वा०
टी०
५

असंस्कृता गर्भाधानादिसंस्काररहिताः प्रजा भक्षयिष्यन्ति धनाद्यपहारादिना पीडयिष्यन्ति ४० किंच तन्नाथास्ते भू-
पाः तासां प्रजानां नाथाः तन्नाथाः तैर्नाथा येषां ते जनपदाः देशवर्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामि-
व शीलमाचारो वादश्च तद्येषां ते ४१ इति द्वादशे प्रथमोऽध्यायः १ द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः अ-
धर्मिष्ठजनेनेहेतुः पुनः कृतयुगागमः १ कलिर्धर्मात्ययं चयिष्यति ततश्चेत्यादिना १ धर्मन्याययोर्व्यवस्था।
असंस्कृताः क्रियाहीना रजसा तमसावृताः प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ४१ तन्नाथास्ते ज-
नपदास्तच्छीलाचारवादिनः अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः ४२ इति श्रीभागवते द्वाद-
शस्कंधे प्रथमोऽध्यायः १ शुक उवाच ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया कालेन बलिना राजन्न-
ङ्क्ष्यत्यायुर्बलं स्मृतिः १ वित्तमेव कलौ नृणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां कारणं बल-
मेव हि २ दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ३ लिंगमेवा-
यां बलमेव हि २ दाम्पत्ये आश्रमख्यातावन्योन्यापत्तिकारणं अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं व।
पतिभावेऽभिरुचिरेव हेतुः न कुलगोत्रादि व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे पुंस्त्वे च नयोः श्रेष्ठो रतिकौ-
शलमेव हेतुः न कुलमाचारो वा ३ आश्रमाणां ख्यातौ ज्ञाने लिंगमेव दण्डाजिनादिकं हेतुर्नत्वाचारविशेषः
अन्योन्यापत्तिकारणं च आश्रमादाश्रमान्तरप्राप्तावेव कारणं यद्वा बहूदकहंसादीनामन्योन्यापत्तेर्न मा-
न्याराद्धिव्यवहारकारणं अवृत्त्या अर्थाभावादिना सम्यक् न्याये दौर्बल्यं पराजयः चापलं वचः वक्रभाषणं

४A

असाधुत्वे चौर्यादिष्वभियोगेष्वस्मै काकीनिमूढ एव न त्वकरं त्वं करोति साधुत्वं दंभ एव उद्वाहे विवादे स्वीकारः न
तत्रानतृप्तिः स्नानमेव प्रसाधनेष्वलंकारः नतयोगस्नानं ४ दूरे वर्तमानवार्य यत्तज्जलाशयस्तीर्थं न तु गंगादि
दिलावण्ये केशेषु धार्यमाणेषु एव शास्त्रीयो भवेनेति उदरंभरत्वं स्वार्थः सत्यत्वे साक्षियार्ष्ट्यमेव मोदं मेव न तु ज्ञानं।
अनाढ्यैनेवासाधुत्वे साधुत्वे दंभ एव च स्वीकार एव चोद्वाहे स्नानमेव प्रसाधने ५ दूरे वार्ययनं तीर्थं ला न
वण्ये केशधारणं उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ६ दाक्ष्यं कुटुंबभरणं यशोऽर्थे धर्मसेवनं
एवमनाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ७ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः प्रजाश्चिलुब्धै
राजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणा यास्यंति गिरिकाननं शाकमूलामिषक्षौद्रफल
पुष्पास्थिभोजनाः ९ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः शीतवातातपप्रावृड्हिमैरन्योन्यतः १४
प्रजाः १० क्षुत्तृड्भ्यां व्याधिभिश्चैव संताप्स्यंते च चिंतया त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणां
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां ११ पाषंडप्रचुरे ध
र्मे दस्युप्रायेषु राजसु चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृप १२ शूद्रप्रायेषु वर्णेषु छागप्रायेषु
प्रकाशेन ९ आच्छिन्नदाराः त्वपहृतदाराद्रविणा निश्चयाः सोताः अर्थं धेनुषु गृहप्रायेष्वाश्रमेषु चौरे
वीन ९ १० क्षीयमाणेष्विति त्यादीनामित्यकलौ गतप्रायः इति पंचमेनान्वयः क्षीयमाणेषु अल्पप्रमाणेषु ११ २
स्यप्रायेषु चौरत्वेषु चौर्यानृतवृथाहिंसाप्रधानानानावृत्तयो येषां तेषु १२ छागप्रायासु समानाः क्षीरल्पप्रजात्

5

भा॰द्वा॰
टी॰
५

स्यान्नदीषु विशुल्कायेषु नदीह्रदकूलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु १५ जनेषु खरधर्मिणि दुःस
हचेष्टिते कलौ गतप्राये समाप्तप्राये १६ एतत्प्रपंचयति चतुर्भिः चराचरगुरोरीश्वरस्यैव धर्मत्राणे हेतुः
गुरुत्वे स्वात्मत्वोपपादनमखिलस्य विश्वस्यात्मनः कारणस्येति एवंभूतस्य हरेर्जन्म साधूनां धर्मत्राणाय
प्रयोजनमाह कर्मापनुत्तये मोक्षाय १७ शम्भलग्राममुख्यस्य प्रधानस्य नाम्ना विष्णुयशसः ब्राह्मणस्य

अणुप्रायास्वोषधीषु शमीप्रायेषु स्थाणुषु विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५ इत्थं कलौ
गतप्राये जनेषु खरधर्मिणि धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरी
श्वरस्याखिलात्मनः धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये १७ शम्भलग्राममुख्यस्य ब्राह्मण
स्य महात्मनः भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति १८ अश्वमाशुगमारुह्य देवदत्तं जगत्
पतिः असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः नृप
लिंगच्छदो दस्यून्कोटिशो निहनिष्य ति

भवने गृहे प्रजो भविष्यति न जात इत्यर्थः १८ धर्मत्राणप्रका
रमाह अश्वमिति अश्वाधवो दत्तं येन तमश्वमारुह्यासिना दस्यून्कोटिशो हनिष्यतीत्युत्तरेणान्वयः अ
साधुदमनमिति पादे कल्किविशेषणं १९ तत्प्रपंचः आशुना शीघ्रगामिना तेन हयेन क्षौण्यां विचरन् अ
णिमाद्यष्टैश्वर्यगुणाः सत्यसंकल्पादयः तैरन्वितः नृपलिंगच्छदः राजवेषच्छन्नान् २० ॥

५

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह अथेति सार्द्धाभ्यां तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति
तत्र हेतुः वासुदेवस्यांगरागेणाचंदनादिनाति पुण्यगंधो योऽनिलस्तस्य स्पर्शो संतीति तथा तेषां २१ स्थविष्ठः स्थूलः
२२ कृतयुगप्रवृत्तिमाह यदावतीर्णइति प्रजानां सूतिः प्रसूतिः २२ तदवतारकालोपलक्षणमाह यदा
चंद्रश्चेति तिष्यः पुष्यः अयमर्थः सूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः तदा कृतयुगं भविष्यतीति यद्यपि

अथतेषांभविष्यंतिमनांसिविशदानिवै वासुदेवांगरागातिपुण्यगंधानिलस्पृशां २१ पौ
रजानपदानांचैवहतेष्वखिल— स्युषु तेषांप्रजाविसर्गश्च स्थविष्ठः संभविष्यति २२ यदाव
तीर्णोभगवानकल्किर्धर्मपतिर्हरिः कृतंभविष्यतितदाप्रजासूतिश्च सात्विकी २३ यदा
चंद्रश्च सूर्यश्च तथातिष्यबृहस्पती एकराशौसमेष्यंतितदाभवतितत्कृतं २४ येतीतावर्त्त
मानायेभविष्यंतिचपार्थिवाः तेतउद्देशतः प्रोक्तावंशीयाः सोमसूर्ययोः २५ ॥

वर्षप्रतिहायनं कर्कटराशौ बृहस्पतौ वर्तमाने द्विरास्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभव
ति तथापि तेषामहःप्रविशंतु विवक्षितः समेष्यंतीति वचनात्तोतिभ्रंसगः २४ एवं नवमस्कंधार्थसा
ध्याउक्तो त वैवस्वतमनोर्वंशाद्दृत्यनिगमयति उद्देशतः संक्षेपतः २५ ॥

भा॰द्वा॰
टी॰
६

कलियुगादौ नरविशेषं वक्तुमाह आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरं शतं चेति कथयामि विवक्षया।
वीतरेभ्यामेयमत्ततः परीक्षिन्नंदयोरंतरे ह्याभ्यामूनवर्षाणां सहस्रं भवति यतः परीक्षितस्य कालमा।
गधिमार्जारिमारभ्य रिपुंजयान्ता विंशतिराजानः सहस्रसंवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे बार्हद्रथभूपा।
लाभाव्याः सहस्रसंवत्सरमिति ततः पंचप्रद्योतना अष्टत्रिंशच्छतं शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यं
ति पृथिवीमित्येवोक्तत्वात् २६ कलेः प्रवृत्तिवृद्धिनिरूपयितुं कालज्ञानोपलक्षणमाह सप्तर्षीणां।

आरभ्य भवतो जन्म यावन्नंदाभिषेचनं एतद्वर्षसहस्रं तु शतं पंचदशोत्तरम् २६ स
प्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि २७

दिवि प्रथममर्यः प्रागग्रशकटाकारेण तारासप्तकं सप्तर्षिमंडलं तत्र किंचिदुन्नते तेषामग्रस्थानीयो मरीचिः त
तः पश्चाद्दानमवगाके धराकारो वसिष्ठः सभार्यः ततः पश्चाद्दीर्घत्वेन तेषां मूलस्थानीयो गिराः ततः।
पश्चाच्चतुरस्रतया चतुष्कं ईशान्ये विः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः ततउत्तरतः
क्रतुः एवंस्थितेतेषां मध्ये यौ पूर्वौ दृश्यमानौ प्रथममुदितौ पुलहः क्रतुसंज्ञौ तयोस्तु मध्ये तयोश्च ६
मध्ये समदक्षिणतः समदेशावस्थितमश्विन्यादिषु यन्यतमं नक्षत्रं दृश्यते २७

6A

तेनैवर्षयो युक्ता नृणामब्दशतं तिष्ठंति ते च द्विजास्त्वदीये काले धुना अधुना मघाख्याश्रिता वर्तंते २८ तेषु
मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुः भातीति भानुः कृष्णस्वात्मकोऽहं दिवं वैकुंठं गतः तदा कलि
युगमविशत् यद्यस्मिन् युगे जनः पापे रमते इति कलियुगस्य लक्षणं २९ ननु श्रीकृष्णस्य पृथिव्यां वर्त
मानेऽपि मध्यारूपेण कलिः प्रविष्ट एवासीत्तत्रापि यावत्तस्य पराक्रमो नाभवदित्याह यावदिति पराक्रांत

तेनैव त्वृषयो युक्तास्तिष्ठंत्यब्दशतं नृणां ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः २८
विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः तदाविशत्कलिर्लोकं पापे यद्रमते जनः २९
यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः तावत्कलिर्वै पृथिवीं पराक्रांतं न चाशकत् ३०
यदा देवर्षयः सप्त मघासु विचरंति हि तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ३१ य
दा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ३२ ॥

मभिभवितुं ३० अतो मघायोगादेव कलिप्रवेशकाल इत्याह यदा देवर्षय इति द्वादशाब्दशतात्मक
दिव्येन मानेन संध्यासंध्यांशाभ्यां सह यो द्वादशशतात्मकः स कलिः तत्संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ३१ कलेः प्रवे
शकालमुक्त्वा तस्य वृद्धिकालमाह यदेति तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नंदात्प्रभृति वृद्धिं गमि
ष्यतीत्यर्थः ३२ ॥ ॥

भा.द्वा.
टी.
८

नक्षत्रे कलेर्लिंगमुपलक्ष्यन्ते देवप्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्रा
ह यस्मिन्निति प्रतिपन्नं प्रविष्टमिति जानन्तु पुराविदः पूर्ववनानाः ३३ कलेरंतेन कृतयुगप्रवेशमाह दि
व्याब्दानामिति चतुर्थे कलौ प्रवेशनाद् परिमिते नाशे नापि सहसा नीते सतीत्यर्थः कृतयुगप्रवेशचिह्नमा
ह यदा नृणाम्मनः आत्मप्रकाशकं भविष्यति तदेति ३४ राजवंशोक्त्या स्थिति सामान्याद्विशेषयति।

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ३३ दि
व्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृते भविष्यति यदा नृणां मन आत्मप्रकाशकं ३४ इत्ये
ष मानवो वंशो यथा संख्यायते भुवि. यथा विट्शूद्रविप्राणां वंशाज्ञेया युगे युगे ३५ एते
षां नाम लिंगानां पुरुषाणां महात्मनां कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ३६
देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः कलापग्राम आसाते महायोगबलान्वितौ ३७ ता
विहैत्य कलेरंते वासुदेवानुशिक्षितौ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्य
दिशति इत्येष इति यथा

यासु तास्तेषां नीचावस्थाभिन्नास्ता प्रक्रिया वंशा इति च पाठः ३५ एतत्कीर्तनस्य वैराग्योपयोगित्वमाह नामे
व लिंगं ज्ञापकं येषां तेषां कथावशेषावशिष्टानां कीर्तिरेव स्थितानतु राज्यपुत्रादयो वा ३६ कलावसन्नानां
राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह देवापिः सोमवंशजः मरुस्तु सूर्यवंशजः कलापग्रामो नामयो।

इममेवप्रकारं प्रतिचतुर्युगं प्रदर्शयति कृतमिति ३९ एतेषां नाम लिंगानामित्यादि यदुक्तं तत्प्रपंचयति राज
न्निति पंचभिः ४० ममत्वकृतेन त्वनेन नष्टचित्ता भूतद्रोहप्रवृत्तिं निंदति कृमीति राजन्नाम्नः राजेति नाम यस्य।
तस्यापि देहस्यांते कृमयो विड्भस्मेति वा संज्ञा भविष्यति तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति सकिं
स्वार्थं वेद कुतः तत्प्रयुक्तायादेहत्वेन भूतद्रोहाद्विशेषेण निरयो भवतीति समनन्तप्रकारे

कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं अनेन क्रमयोगेन भुवि प्राणिषु वर्तते ३९ राजन्नेते मया प्रो
क्ता नरदेवास्तथापरे भूमौ ममत्वं कृत्वांते हित्वेमां निधनं गताः ४० कृमिविड्भस्मसंज्ञांते राजनाम्नो
पि यस्य च भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ४१ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता मत्सुत
स्य च पौत्रस्य मत्पूर्वा वंशजस्य च ४२ तेजोवन्नमयं कायं गृहीत्वात्मतयाबुधाः महीं ममतया चो
भौ हित्वांतेदर्शनं गताः ४३ येये भूपतयो राजन्भुंजंति भुवमोजसा कालेन ते कृताः सर्वे कथामात्राः क
थासु च ४४ इति श्रीभागवते द्वादशस्कंधे द्वितीयोध्यायः २ ॥

प्रपंचयति कथमिति सेयमखंडा भूमिः पूर्वजैः पुरुषैः धृता मत्सुतस्य पौत्रस्य च भवित्री इदानीं मत्पूर्वा च मत्तोत्तमसुतादेः कथं
स्यादित्येवं ४२ उभौ महीं कायं च ममेदं दर्शनं मृत्युं ४३ उपसंहरति येयेइति तेसर्वेऽपि च कथास्वेव क्रियमाणासु
कथामात्राः कालेन कृताः ४४ इति भावार्थदीपिकायां द्वादशस्कंधे द्वितीयोध्यायः २ ॥

४

मो॰हा॰ टी॰ ६ ततीयेभूमिगीतेष्वराजदोषादिवर्ण्यते कलौचदोषभूयिष्ठेदोषंदर्शीरेरतीति: १ देहेहतोभूमौचममताकुर्वत
तानुथारत्युक्तं तदेवभूमिगीतैः प्रपंचयति दृष्ट्वात्यादिना आत्मनिपृथिवीजये व्यग्रान् उद्युक्तान् हासप्रका
रमाह अहोइति येनकामेनफेनोपमेपिडेदेहेविस्रंभिताविस्रासमनीनायतेषांनदेहाणांमत्यएषकामोमोघ
एवस्यात् १ काममेवदर्शयति द्वाभ्यां पूर्वमिनिंद्रियार्थलपदस्यनराज्यप्राप्तिःस्यादितिशयमिंद्रिय

शुकउवाच दृष्ट्वात्मनिजयेव्यग्रान्नृपान्हसतिभूरियम् अहोमांविजिगीषंतेमृत्योःक्रीडनकानृपाः
१ कामएषनरेन्द्राणांमोघःस्याद्विदुषामपि येनफेनोपमेपिंडेयेतिविस्रंभितानृपाः २ पूर्वंनिर्जि ति
त्यषड्वर्गंजेष्यामोराजमंत्रिणः ततःसचिवपौराप्तकरीन्द्रानस्यकंटकान् ३ एवंक्रमेणजेष्या
मः पृथ्वींसागरमेखलां इत्याशाबद्धहृदयानपश्यंत्यंतिकेंतकं ४ समुद्रावरणांजित्वामांवि
शंत्यब्धिमोजसा कियदात्मजयस्यैतन्मुक्तिरात्मजयेफलं ५

षड्वर्गंनिर्जित्यराजमंत्रिणोजेष्यामः वशीकरिष्यामः सचिवाः अमात्याः करीन्द्राहस्तिपाः तांश्चजेष्यामः
कंटकान्प्रतिपक्षान् अस्यअपास्यअयंकंटकानितिवापाठः ३ एवंक्वचिदाशाबद्धहृदयाः ४ एवंके
चित्तुमांजित्वाप्यनितृप्त्याअब्धिंविशंति तदेवमिंद्रियजयेनयेराज्यंसाधयितुमिच्छंति तेतिम २
दाइत्याह कियदिति अतः अंतकंनपश्यंतीत्युक्तम् ५ ॥ १

नदेवाद यामिति कुरुहदेरेति भूमिगीतेकथंयेनमूढकःसंबोधयति कुरुहदरतिनपादःसुगमः ८ ग्रसुह
यदसुक्तंनत्वपंचयति मल्कनसृति ७ ८ रामोनामकश्चिद्राजा यद्वालोकदसादशरथिरेवनिर्दिष्टः ९ १०

यांविसृज्येवमनवसन्नूनायकुरुहुद गताघ्यागर्तेपुहेतांमांजेघ्नन्यवुहयः ९ मल्कीतेपितृप
त्रोणांभ्रातृणांचापिविग्रहः जायतेप्रसतंराज्येममतावद्रुचेतसां ७ ममचेयंमहीकृत्स्नान
तेमूर्खैतिवादिनः स्पर्द्धमानामियोभ्रतिम्रियंतेमल्कनेनृपाः ८ पृथुःपुरूरवाश्चापिनहुषोभ
रतोर्जुनः मांधातासगरोरामः खट्वांगोधुंधुहारकः ९ तृणविंदुर्ययातिश्चशर्यातिःशंतनुर्ग
यः भगीरथः कुवलयाश्वःककुत्स्थोनैषधोनृगः १० हिरण्यकशिपुर्वृत्रोरावणोलोकरा
वणः नमुचिःशंवरोभौमोहिरण्याक्षोथतारकः ११ अन्येचवहवोदैत्याराजानोयेममेश्वराः
सर्वेसर्वविदाःशूराःसर्वेसर्वजितोजिताः १२ ममतांमय्यवर्त्तंतकृत्वोत्सृज्यपंचधर्मिणः
कथावशेषाःकालेनमूढकृतार्थाःकृ
तोकंरावयतिरोदयतीतिलोकरावणः ११ १२ मयिउच्चैर्मम
तांकृत्वायेप्रवर्त्तंत तेकालेनकथावशेषाःकृताः विभोःइतिसंबोधनं कुरुहदेतिवत् १२ ॥

९

भा॰द्वा॰ टी॰ ३

राजन्नेवं ज्ञानु कथनस्य तात्पर्यमाह कथा इमा इति विज्ञानं विषयासारता ज्ञानं ततो वैराग्यं तयोर्विवक्षया परेयु
षां सतां न वचो विभूतीः वाक्विलासमात्ररूपाः परमार्थः परमार्थयुक्तकथनं न भवतीत्यर्थः १४ कस्तर्हि पु
रुषाणामुपादेयः परमार्थः तमाह यस्त्विति नित्यं प्रत्यहं तत्राप्यभीक्ष्णं १५ कलिदोषोपचयेन तिभिते
रसंभवमन्यमानः पृच्छति केनोपायेनेति विधमिष्यन्ति नाशयिष्यन्ति यथा यथावत् १६ कलि

कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषां विज्ञानवैराग्यविवक्षया विभो वचो
विभूतीर्न तु पारमार्थ्यं १४ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः तमेव नित्यं शृ
णुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः १५ राजोवाच केनोपायेन भगवन् कलेर्दो
षान् कलौ जनाः विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने १६ युगानि युगधर्मांश्च मानं प्रल
यकल्पयोः कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः १७ शुक उवाच कृते प्रवर्तते धर्मश्चतु

युगे कः परमो धर्म इति च पृष्टत्वादाह \ ष्पात्तज्जनैर्धृतः सत्यं दया तपो दानमिति पादा विभोर्नृप
ति युगानीति ब्रूहीत्यनुषंगः आत्यन्तिकनित्यासु पापघ्नः पृच्छति प्रलयकल्पयोः संहारस्थितिका
लयोः नचाप्येवं हि भवेः प्रष्टुरत्याह कालस्येति १७ तत्र युगधर्मानाह कृत इति तज्जनैस्त
त्कालीनैः जनैः दानेन्यायागात् एतया त्रिभयदानेन देवमधमस्त्वधेयोऽवशाहृत्वोक्ते विभोः सर्वात्मक

तदानीं जनजनानाह संतुष्टा इति मैत्राः भूतमैत्रीयुक्ताः श्रमणाः आत्माभ्यासवंतः १९ २० ब्रह्मोत्तराब्र
ह्मणाधिकाः २१ अनृतेन सत्यं हिंसया दया असंतोषेण तपः विग्रहेण दानमिति यथासंख्यं योज्यं हिंसा
तुष्टानृतद्वेषैरित्यत्र क्रमो न विवक्षितः धर्मस्यार्द्धं ह्रसतीति हीयते अधर्मस्य लक्षणैः लिङ्गैः पादैरित्यर्थः २२

संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः आत्मारामाः समदृशः प्रायशः श्रमणा जनाः १९ त्रेता
यां धर्मपादानां तुर्यांशो हीयते शनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदा क्रियातपोनि
ष्ठा नातिहिंस्रा न लंपटाः त्रैवर्गिकास्त्रयीविद्यावर्णा ब्रह्मोत्तरा नृप २१ तपःसत्यदयादानेष्वर्द्धं
ह्रसति द्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनो महाशीलाः स्वाध्यायाध्य
यने रताः आढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः २३ कलौ तु धर्मपादानां तुर्यांशोऽधर्म
हेतुभिः एधमानैः क्षीयमाणो ह्यंते सोऽपि विनंक्ष्यति २४ तस्मिंल्लुब्धा दुराचारा निर्दयाः शुष्कवै
रिणः दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः २५ सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः का
लसंचोदितास्ते वै परिवर्तंत आत्मनि २६

यशस्विनः कीर्तिमायात्र क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः २३ कलौ धर्मपादानां तुर्यांशस्तुर्यो
ऽपि नशिष्यते २४ शूद्रदासोत्तराः शूद्रकैवर्तादिप्रधानाः गुणानामेव भूतेषु ध्येकारणमाह सत्त्वमि

भा॰ द्वा॰ मनस्यबुद्धिरिन्द्रियाणि च सत्वे यदा प्रभवन्ति प्रतिविषये न वर्त्तन्ते २७ यदा कर्मादिषु भक्तिः प्रीतिः तदा रजोवृ
टी॰ त्तिः प्रधाना त्रेतायुगमिति जानीहि २८ काम्यानां कर्म्मणां विषये यदा प्रीतिस्तदा रजस्तमः प्रधानं य
९ द्वापरं जानीहि २९ विषादनं दुःखं ३० कलिदोषान्प्रपञ्चयति यस्मादित्यादिना यस्मात्कलेर्हेतोः क्षुद्रदृ
शो भेदमतयः क्षुद्रभाग्याः अल्पभाग्याः महाशनाः बहुभक्षकाः वित्तहीना अपि कामिनः स्वैरिण्यः पुंश्च

प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः २७ यदा कर्म
सु काम्येषु भक्तिर्यशसि देहिनां तदा त्रेता रजोवृत्तिरिति जानीहि देहिना २८ यदा लोभस्त्वसन्तोषो
मानो दम्भोऽथ मत्सरः कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः २९ यदा मायानृतं तन्द्रा निद्रा हिं
सा विषादनं शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ३० यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभा
ग्या महाशनाः कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसती ३१ दस्यूत्कृष्टा जनपदा वेदाः पाष
ण्डदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३२ अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बि

त्यः स्वमतीः असत्यः ३१ दस्यवः उत्कृष्टाः प्रचुरा येषु ते ३२ अव्र \ नः तपस्विनो ग्रामवासा न्यासि नोऽत्यर्थलोलुपाः ३३
ता विहिताचारशून्याः अशौचाः शौचशून्याः वटवो ब्रह्मचारिणो भविष्यन्ति कुटुम्बिनश्च गृहस्थाः स्व
यं भिक्षामश्नन्ति तपस्विनो वनस्था वनं हित्वा ग्रामवासा भविष्यन्ति न्यासिनो यतयः अतिलोलुपाः भविष्यन्ति ३३ ॥

10A

पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया च कपटं च अत्र
साहसं यासां ताः ३४ किंच किराताः वणिजः पणायिष्यन्ति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यन्ति किंच सर्वे
जना अनापद्यपि जुगुप्सितां निन्दितां वार्तां वृत्तिं साधु मंस्यन्ते ३५ सर्वोत्तममपि पतिं द्रव्यहीनं भृत्यास्त्यक्ष्यन्ति
पतयो भृत्यं विपन्नं रोगादिभिर्व्यापारासहतमं कौलं कुलकपरंपरायातं त्यक्ष्यन्ति अपयस्विनी दुग्धदोहाः ३६

ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४ पणायि
ष्यन्ति वै लुब्धाः किराताः कूटकारिणः अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ३५ पतिं त्यक्ष्यन्ति नि
र्द्रव्यं भृत्या अप्यखिलोत्तमं भृत्यं विपन्नं पतयः कौलकाश्चापयस्विनी ३६ पितृभ्रातृसुहृज्ज्ञातीन्
हित्वा सौरतसौहृदाः ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ३७ शूद्राः प्रतिगृहीष्यन्ति तपो
वेषोपजीविनः धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासने ३८ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः
निरन्ने भूतले राजन्ननावृष्टिभयातुराः ३९ वासोऽन्नपानशयनव्यवायस्नानभूषणैः हीनाः पिशाच
संदर्शा भविष्यन्ति कलौ प्रजाः ४०

सौरतं सुरतनिमित्तं सौहृदं येषां ते अत एव ननान्दा गोत्रभार्या भगिन्यः श्यालाः भार्याभ्रातरः तैः संवादो मन्त्रा
लोचनं येषां ते ननान्दुरिति वा पाठः ३७ ३८ ३९ पिशाचसंदर्शाः पिशाचसदृशाः ४० ॥

भा.द्वा.
तृ.
११

काकिणिके विंशतिवराटकमात्रेप्यर्थे विग्रहं वैरं कृत्वा ४१ ४२ महान्तमनर्थमाह द्वाभ्यां कला
विति त्रिलोकनाथैरवनतैर्नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति न पूजयिष्यंति पाषंडैर्विभिन्नमन्यथाकृ
तं चेतो येषां ते ४३ विवशो गृणन्नुच्चरन् विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबंधा यस्मात्सः ४४ न देवं कलि।

कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः त्यक्ष्यंति च प्रियान्प्राणान्हनिष्यंति स्वकानपि ४१
न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि पुत्रान्सर्वार्थकुशलान्क्षुद्राः शिश्नोदरंभराः ४२ कलौ
न राजन्जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजं प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पा
षंडविभिन्नचेतसः यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् वि
मुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ४४ पुंसां कलिकृतान्दोषान्द्रव्यदे
शात्मसंभवान् सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ४५ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृ
तोपि वा नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ४६ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातु

दोषान्वेषपच्च प्रसक्तं तेन चित्तशोधनोपायमाह पुंसामिति जं एवमात्मगतो विष्णुर्योगिनामशुभाशयं ४७
षड्भिः द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चिंतितः स्मृतः ४६ ध्यानमेवोपायो नान्य इति सदृष्टां
तमाह यथेति धातुजं ताम्रादिसंसर्गजातं हेम्नो दुर्वर्णं मलिनस्वभावं मालिन्यं तत्रस्थितो वह्निरेव हंति

[illegible] ॥

पतद्देवविष्णोरिति विद्येति विद्या गायत्री देवतोपासना ४८ आत्मभावं स्वस्वरूपे ४९ ५० इदानीं कलिदोषो
ति कलेर्दोषनिधे राजन्निति ५१ तस्मैव हरिकीर्तनादेव कलौ भवति ५२ इति भावार्थे तृतीयोध्यायः
चतुर्थे चतुर्थकालत्रयात्मनैमित्तिकादयः तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते १ कस्मिन् दोषनिवर्त
के हरिनामसंकीर्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नहृदयस्योत्तरमुक्तं यच्चान्यत्स्पृष्टं प्रलये कल्प।

विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे
भगवत्यनन्ते ४८ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं म्रियमाणो ह्यवहितस्ततो यासि प।
रां गतिं ४९ म्रियमाणैरभिध्येयो भगवान् परमेश्वरः आत्मभावं नयत्यङ्ग सर्वात्मा सर्वसंश्रयः ५०
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ५१ कृते
यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ५२ इति श्रीभाग।
वते एकादशस्कन्धे तृतीयोध्यायः ३ शुक उवाच कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप कथि।

येमां नेहरीति तदिदानीं तृतीयस्कन्धोक्तकालानुवादः तो युगमानं च शृणु कल्पलयावपि १
वैकुण्ठं निरूपयति काल इति स कालः परमाणुर्वै यो भुङ्क्ते परमाणुतामित्यादिना कालः कथितः चत्वारि
त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च युगमानं च कथितं १॥

12

भा०द्वा० ब्रह्मकल्पमाह चतुर्युगेति यत्र चतुर्दश मनवः क्रमेणाभवंति १ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृ

टी० तिकः आत्यंतिको नित्यश्चेति तत्र नैमित्तिकप्रलयमानसहितमाह तदेतदिति द्वाभ्यां तावान् चतुर्यु

गसहस्रप्रमाणः सैव ब्राह्मी रात्रिः २ नैमित्तिकत्वं दर्शयति यत्र यदा विश्वसृक् श्रीनारायणः विश्व

१२ मात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते अयमात्मभूः ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मणापवा

चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते स कल्पो यत्र मनवश्चतुर्दश विशांपते २ त

दंते प्रलयस्तावत्ब्राह्मी रात्रिरुदाहृता त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि ३ ए

ष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः

४ द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै

५ एष प्राकृतिको राजन् प्रलयो यत्र लीयते आण्डकोशस्तु संघातो विघात उपसादिते

तेनासनत्वमके ब्रह्मणो निद्रानिमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ४

प्राकृतिकप्रलयमाह द्वाभ्यां द्विपरार्द्धे तु ब्रह्मणायुषि समाप्ते प्रकृतयः महदहंकारपंचतन्मात्रा

णि ५ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यस्य ब्रह्मांडस्य च प्रलयात्प्राकृतिक इत्यर्थः १२

विघाते विघातकारणे उपसादिते सति ६ ॥०

तदेवाह पर्जन्य इत्यादिना वृष्टीदिग्यादिरूपेणान्वयः प्राक्तनेन ग्रंथेन ७ सामुद्रादिकं सर्वं रसं रविः पि
बते यावत्कर्षति ८ अनिलवेगोत्थः वायुवेगोद्भूतः अनिलवेगो वा इति पाठे अनिलेन वेगो यस्यासः वार
णा रश्मिभिः पीतमुदकं च दहतीत्यर्थः अनिलवेगो वा इति न पाठे सुगमः भूविवरान् पातालादीन् अ
न्यान् रविणा दैदिकरमाकर्षणान्याणारहितान् ९ शिखाभिः ज्वालाभिः किंचिदधिकवर्षाणां शतं सव

पर्जन्यः शतवर्षाणि धूमोगाजन्न वर्षति तदा निरन्नेह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः दग्धयास्य
निपातकैः कालेनोपद्रुताः प्रजाः ७ सामुद्रं दैहिकं भौमं रसं सांवर्तको रवि रश्मिभिः पिबते घो
रैः सर्वं नेव विभुर्वति ८ ततः संवर्तको वह्निः सकर्षणमुखोत्थितः दहत्यनिलवेगोत्थः
भूत्वान्भुविवरानथ ९ उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः दह्यमानं विभात्यंडं दग्धगोमय
पिंडवत् १० ततः प्रचंडपवनो वर्षाणामधिकं शते परः सांवर्तको वाति धूम्रं खं रजसावृते ११ त
तो मेघकुलान्यंग चित्रवर्णान्यनेकशः शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः ततएकोदकं
विश्वब्रह्मांडविवरान्तरे १२

तेकः पयो ऽनुपुर्वोति तदा रजसावृतं खं धूम्रं भवति ११ रभसस्वनैः तीव्रगर्जितैः १२ ब्रह्मांडवि
वरान्तरे ब्रह्मांडविवरमध्यगतं विश्वं एकोदकं एकार्णवोदकव्याप्तं भवति १२ ॥

13

भा॰ द्वा॰ उदप्लवे उदकेनाप्लाविते सति प्रलयत्वाय अभावाय १४ भूतादिस्तामसोहंकारः गुणैर्हृतिभिः सह १५
टी॰ अव्याकृते प्रधाने १६ तस्मात्त्वलयो नास्तीत्याह ततस्येति कालावयवैः अहोरात्रादिभिः गुणाभाव
१२ विकारः परिणामः अव्यक्तमसिलित्वविकारस्मूर्त्ते नित्यसर्वदैकरूप वृद्धिरहितमित्यर्थः अव्ययश्च।
तदा भूमेर्गंधगुणं अस्तमापउदप्लवे अलयायात्पृथिवी प्रलयत्वाय कल्पते १४ अपां रस
मथो तेजसा लीयते यनीरसाः ग्रसते तेजसो रूपं वायुस्तद्रहिते तदा १५ लीयते चानिले ते
जो वायोः खं ग्रसते गुणं सवै विशति विराजे स्ततश्च नभसो गुणम् १६ शब्दं ग्रसति भू
तादिर्नभस्तमनुलीयते तैजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः १७ महान्ग्रसत्य न
हंकारं गुणाः सत्वादयश्च तं ग्रसते व्याकृतं राजन्गुणान्कालेनचोदितं १८ ततस्य
कालावयवैः परिणामादयो गुणाः अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययम् १९ न यत्र
वाचो न मनो न सत्वं तमो रजो वा महदादयोमी न प्राणबुद्धींद्रियदेवता वा न सन्निवे
शः खलु लोककल्पः २०
प्रलयस्य मूलं सर्वत्र हेतुः कारणमिति १९ किंच वागादिगोचरस्य सविशेषस्य विकारस्याभावेति
इदंतत्तनयेत्याह नयत्रेति द्वाभ्यां लोककल्पः लोकरूपः सन्निवेशो रचनाविशेषः २०॥ ० १२

13A

स्वप्नजागरितस्वप्नजागरावस्थायुतंस्वप्नवदिंद्रियाद्यभावात् शून्यमाह अथेदं तु अयं तर्हि पुनः शून्यमेवेत्या
ह नहीति २२ उपमेः इति लयइतिशक्तयः सत्वादयः २२ आत्यंतिकप्रलयमाह बुद्धीद्रियेति द्वाभ्यामि:
आत्यंतिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः न च प्रपंचस्यात्मत्वात्तस्य तत्त्वेन लयः संभवतीति तन्ना
न तूपाद्युपाणः इत्यत्र भूतस्यास्तत्वमुपपादयति बुद्धिस्वेंद्रियाणि च अर्थो अत्येव याद्दक्करणग्राह्यरूपाणि ते
षामस्ये ज्ञानमेव भाति न पृथक् तत्र हेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति अन्नोपदर्शितवदवसेयं अथैवम
नुमप्रजायत्व च तत्स्वरूपं तं लेभे अनिलोग्निरर्कः स्वरूपमवज्ञान्यवदप्रतर्क्यं तन्मूलभूतं पदम्
मनेति २१ लयः प्राकृतिको प्रेषु पुरुषाव्यक्तयोर्यदा शक्तयः संप्रलीयंते विवशाः कालविद्रुताः २२
बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् २३ दीपवत्स्व
योगः विभक्तस्त्र भवति दृश्य रूपच ज्योतिषो न पृथग्भवेत् एवं धीखानिमात्राश्च न स्युरन्यतमादृतात् २४
त्मकारणाव्यतिरेकात् आद्यंतवत्त्वाच्च रज्जुसर्पादिवदिति २३ तद्व्यतिरेकं दृष्टांतेन प्रपंचयति दीपइति
दीपचक्षूरूपाणीति तेजोविशेषाणां तथा तेन सोव्यतिरेकः तथाधीः कर्त्री खानि करणानि मात्रा विषयाः स्व
तात्स्वरूपाः पृथक् न स्युः ब्रह्मकार्यत्वात् नन्वेवं कार्यकारणयोरभेदे कार्यासत्वे कारणस्याप्यसत्वप्रसंगः इत्यत
आह अव्यक्तमादिति कार्याद्दत्यं तद्व्यतिरिक्ता ब्रह्मणः प्रपंचाद्ब्रह्मणो नास्ति व्यतिरेकः प्रपंचस्य तु नास्ति एका इत्या

न सि ततो व्यैति

14

भा॰ द्वा॰ यदा बुद्धेः सत्त्वे तदा तदवस्थानां स्वतः सत्त्वमित्याशयेनाह बुद्धेरिति ननु विश्वतैजसप्राज्ञानामेतास्ववस्था

टी॰ न तु बुद्धेरित्याशङ्क्याह मायामात्रमिति इदं विश्वतैजसप्राज्ञत्वं २५ आद्यन्तवत्त्वादित्यस्य हेतोरसिद्धि

माशङ्क्यावयवत्वेन साधयति यथेति अवयवीति यस्मादवयवैरुदयव्ययवान् घटादिवदित्यर्थः

२६ अतउदयाप्ययात् आद्यन्तवत्त्वाद्विश्वमसत्स्वभावमित्यर्थः यद्वा उदयोवा मायायाविलासाद्विश्वं मिथ्या ब्रह्म

तु न तदवधित्वात्सत्यत्वमित्यनेन साध्यते दृष्टान्तस्तु स्पष्टोक्त एव यथा जलधरा व्योम्नीति दृष्टान्ताभासा

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते मायामात्रमिदं राजन्नानात्वं प्रत्य
गात्मनि २५ यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ब्रह्मणीदं तथा वि
श्वमवयव्युदयाप्ययात् २६ सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह
विनार्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः २७

पार्थिवदवधित्वमात्रे न तु मिथ्यात्वेऽपि इति २६ अन्यत्वमाह सत्यादिति प्रतिज्ञाते कारणस्य सत्यत्वमुप
पादयति सत्यं हीति अवयवः कारणं प्रोक्तः वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति
श्रुत्यादिस्मृतिभिः अत्र युक्तिमपि दर्शयति विनेति अङ्ग हे राजन् हि यस्मादर्थेन अवयविना पृथ
गेवावयवाः प्रतीयेरन् यथा पटस्यावयवाः तन्तवो पटात्पृथक् प्रतीयन्ते न हीति २७ १४

14B

ननु कार्याभावे कारणत्वव्रमणः कुतो यदेतदपि नास्तीव समत्वमित्याह यदिति सामान्यकारणे विशेषः कार्यं तद्रूपेणान्योन्यापाश्रयात् परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः अतः कारणत्वमवधित्वव्यापकत्व मित्यादिकमपि परस्परापेक्षत्वादारोपितवदवस्तुवदेवमवादित्यर्थः यद्वा तदेव हेत्वन्तरमेतत् यदुपलभ्येत सम्भ्रमः सामान्यविशेषरूपत्वात् सम्भवेत् अन्योन्यापाश्रयादित्येतदपि हेत्वन्तरं गुणगुणिविशेषणविशेष्यत्वा व्यापकत्वादिरूपेण परस्पराधीनसिद्धत्वात् तथाभूतस्य प्रवादितिनिगमनं अतोऽपरं यत्तदवस्तुवदेवमवादि

यत्सामान्यविशेषाभ्यामुपलभ्येत सम्भ्रमः । अन्योन्यापाश्रयात्सर्वमारोपितवदवस्तुवत् २८
विकारः ख्यापनानोऽपि प्रत्यगात्मानमन्तरा । न निरूप्योऽस्त्यणुरपि स्याच्चेत्सोऽपि समात्मवित्

नि २८ तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्त्वप्रसाधिते तत्र शंका ननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत् सत्त्वं किं न स्यादिति तत्राह विकार इति ख्याप्यमानः प्रकाशमानोऽपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं विना अणुमात्रोऽपि न निरूप्योऽस्ति न विना निरूप्यः स्याच्चेत्तर्हि सोऽपि चिन्मयः स्यात् चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् तथा च सति सोऽप्यात्मवत्स्यात् एकरूपः स्यादित्यर्थः २९ ॥

15

भा॰ टी॰ कुतः इत्यत आह तत्त्वमस्याद्यात्मनोर्जीवब्रह्मरूपेण नानात्वमस्त्येवेत्यत आह यद्येवं नानात्वमन्यते न
टी॰ ह्यविद्वान्कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृत इत्याह नानात्वमिति नत्वच्छिद्रयोर्घटाकाशम
१९ हाकाशयोरिव परिच्छेदे दृष्टान्तः ज्योतिषोः आकाशजलस्थसूर्ययोरिवेति उपाधिकृताविकारस्वदम

नहि सत्यस्य नानात्वमविद्वान्यदभिमन्यते नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातवायोरिव १८ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः १९

ह्रावेवानयोर्वा शरीरस्थवाय्वोरिवेति क्रियाभेदे १८ ब्रह्मण एव प्रपंचव्यवहारालंबनत्वं दृष्टान्तेन स्पष्टयति यथेति क्रियाभिर्नानाद्रव्यनामभेदैर्बहुधा कटककुण्डलादिरूपेण लौकिकवैदिकैर्वचोभिर्जनैः अरकारोपहितैः १९ श्रीरामचन्द्राय नमः ॥ ० ॥ १५

नन्वहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वं तस्य कारणभूतब्रह्मावारकत्वासंभवात् आवरणे वा
स्वस्यापि प्रकाशासंभवादित्याशंक्य सदृष्टान्तमाह अर्केरश्मय एव मेघरूपेण परिणता वर्षंति अग्नौ प्रास्ताहु
तिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इत्यादिवचनात् तस्मादर्कप्रभवः अ
र्केणैव दर्शितः प्रकाशितश्च सः स्वरूपभूतार्कदर्शनप्रतिबंधको भवति अहमहंकारः ब्रह्मकार्यभूतः त

यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांश
कस्यात्मन आत्मबंधनः ३३ घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा यदा ह्य
हंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ३४ यदैवमेतेन विवेकहेतिना मायाम
याहंकरणात्मबंधनं छित्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यंतिकमंग संप्लवं ३५ नित्यदा

दीक्षितेनैव प्रकाशितस्य आ सर्वभूतानां ब्रह्मादीनां परंतप उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रच। क्षते
त्मनो जीवस्यात्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ३५ अत एवाहंकारनाशे स्वरूपदर्शनं भ
वतीति तेनैव दृष्टान्तेनाह आत्मनः उपाधिः जिज्ञासया विचारेण तर्हि तदा अनुस्मरेत् शाहं ब्रह्माहमिति
प्रत्येतव्यः ३३ सोऽयमात्यंतिकः प्रलय इत्युपसंहरति यदैवमिति विवेकहेतिना ज्ञानेन शास्त्रेण अ
हंकरणमेवात्मबंधनं अच्युतपरिपूर्णमात्मानमनुभवतीति ३४ तया नित्यप्रलयमाह नित्यदेति ३६

कुत इत्यत्राह कालेति परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां यथा उच्चनीचावस्थाः ताः कालप्र
वाहेनाह्रियमाणस्य देहादेः प्रत्यक्षमानत्वान्न दृश्यन्त एव नित्यदा जन्मप्रलयहेतवो भवन्तीति ३६
देहः प्रतिक्षणं प्रध्वंसी प्रतिक्षणमवस्थाभेदस्य विद्यमानत्वात् दीपादिवदित्यनुमानेन प्रतिक्षणमव
स्थो भवति तर्हि किं न दृश्यते अतो हेतुरसिद्ध इत्याशंक्याह अनाद्यन्तवता कालेन जायमानानामव

कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा परिणामिनामवस्थास्ता जन्मप्रलयहेत
वः ३६ अनाद्यन्तवतानेन कालेनेश्वरमूर्तिना अवस्था नैव दृश्यन्ते वियति ज्यो
तिषामिव ३७ नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः आत्यन्तिकश्च क
थितः कालस्य गतिरीदृशी ३८ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिल
सत्त्वधाम्नः लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः

स्था नैव लक्ष्यन्ते आकाशे गच्छतां ज्योतिषां चेद्दादीनां गमनागमनावस्थाविशेषा यथा नैव लक्ष्यन्ते
न दृश्यन्ते अतो यथा तेषामेकस्मात् अन्यत्र प्राप्त्या प्रतिक्षणं गत्यावस्थाः कल्पन्ते न दृश्याश्च अपि बाल्यतारुण्यादि
दर्शनेन मध्यवर्तिन्योऽवस्थाः कल्प्यन्त इति न हेतुरसिद्ध इत्यर्थः ३७ उपसंहरति नित्य इति ३८ पुरा
णार्थमुपसंहरति एता इति लीलाविषयाः कथाः अजो ब्रह्मापि कार्त्स्न्येनाभिधातुं नेशः ३९ ॥ १९

ननुसाकल्येनाभिधानंनशक्यते तर्हिकिंतदभिधानेनेत्याह संसारेति विविधंदुःखमेवदवोदावान
लस्तेनार्दितस्यपीडितस्य युतरूत्तितीर्षोः पुंसः भगवतोयालीलालासांकथाः तासांरसस्तन्निषेवणं।
मंतरेणान्यःप्लवः उत्तरणसाधनंनभवेत् उपायांतरासंभवात्कथाश्रवणमेवयथाशक्तिनिषेव्यमित्य

मतितु
संसारसिंधुंस्तर मुत्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य लीलाकथारसनिषेवणमंतरे
ण नपुंसोभवेद्विविधदुःखदवार्दितस्य ३९ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः नारदाय
पुराप्राहकृष्णद्वैपायनायसः ४० सवैमह्यंमहाराजभगवान्बादरायणः इमांभागवतींप्रीतः
संहितांवेदसम्मिताम ४१ एतांवक्ष्यत्यसौसूतऋषिभ्योनैमिषालये दीर्घसत्रेकुरुश्रेष्ठसंपृ
ष्टःशौनकादिभिः ४२ इतिश्रीभागवतेद्वादशस्कंधेचतुर्थोऽध्यायः ४ ॥

र्थः ३९ श्रोतृणामादरार्थंसंप्रदायमनुक्रमाह पुराणसंहितामितित्रिभिः ४० सवैबादरायणःप्रीतः
सन्मह्यमितिमांसंहितांप्राहेतिशेषेणान्वयः ४१ इमांसूतइतियुक्ततःस्थितमंगुल्यानिर्दिश्याह नैमि
षालये नैमिषारण्यस्थाने ४२ इतिश्रीभावार्थेद्वादशस्कंधेचतुर्थोऽध्यायः ॥ ० ॥

17

भा० द्वा० टी० १८

पंचमे तु समासेन परब्रह्मोपदेशतः । राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणं १ एतत्पुराणं शृण्वत्त्वभ
यं शास्त्रोक्त्या निवर्त्य पुराणार्थमनुस्मारयति अत्रेति अयं भावः जगतः कर्ता ब्रह्मापि यस्य प्रसादजः
प्रसादो ब्रह्मोत्पत्तिनिर्देशः ततो जातत्वादस्वतंत्रः सर्वसंहर्ता रुद्रस्यापि क्रोधसंभवो न तु स्वतंत्रः स्ववि
षयस्यात्मा निर्गुणो भगवाननुवर्ण्यते अतएवंभूतं भगवंतं शृण्वतः कुतो यस्माद्भयसंकेति २
त्वं पुनः कृतार्थ एवेत्यनुस्मारयति त्वं त्विति पशुबुद्धिमविवेकं यस्मात्त्वं न नंक्ष्यसि कुत इत्यत आ

शुक उवाच अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधस
मुद्भवः १ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्य स्य
सि २ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः ति

२ तु जात इति यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति च नैवं त्वं पूर्वं नाभूरेवाद्य जातोऽसि अतो न
नंक्ष्यसि २ न तु बीजादंकुरवत्त्वमपि पुत्ररूपेण स्वयमेव भवति यथाह श्रुतिः अंगादंगात्संभवसि हृ
दयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति ततः पुनरंकुराद्बीजमिव पौत्ररू
पेणापि स्वयमेव भवति पिता पुत्रेणापि तन्मात्मानियोगताविति श्रुतेः अतस्त्वं अनश्यत्त्वकथं नंक्ष्य
स्यसीति चेत्तत्राह न भविष्यसीति भूत्वा पुत्रपौत्रादिरूपवान्बीजांकुरवन्न भविष्यसि यस्माद्देहादे

कीर्तिमिति यथानलः काष्ठादेर्दाह्यादेर्जायते नासि श्लो० ५ ॥ १८

9

178

जन्मादीनां देहधर्मत्वं दर्शयंस्तत्प्रपंचयति स्वप्नेति। स्वप्ने यथात्मनः शिरश्छेदं स्वयं पश्यति एवं जागरितोऽपि य
स्माद्देहस्य पंचत्वादिकं पश्यति ततस्तदेवात्मनः देहममात्रं वस्तुतस्त्वात्माजो मरश्चेत्यर्थः तदुक्तं आत्मनः
पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः इत्यादि ४ यस्माद्देहोपाधिकाय मा
त्मनो जन्मादि स मायामयः तस्मादुपाधिनिवृत्तौ मुच्यत इति सदृष्टान्तमाह घटेति यथा पुराघटोपाधिरूपि

स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं। यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ४ घटे भि
न्ने यथाकाश आकाशः स्याद्यथापुरा। एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ५ मनः सृजति वै देहा
न्गुणान्कर्माणि चात्मनः। तन्मनः सृजते माया ततो जीवस्य संसृतिः ६ स्नेहाधिष्ठानवर्त्यग्नि। १
संयोगो यावदीयते। ततो दीपस्य दीपत्वमेवं देहकृतो भवः। रजःसत्त्वतमोवृत्त्या जायतेऽथ विनश्यति ७

त स्थितपुनर्घटे भिन्ने तदवरुद्धावकाश आकाश एव स्याद्यथा एवं देहे मृते तत्त्वज्ञाने लीने सति ५ ज्ञानेवल
येन भावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबंधप्रकारमाह मन इति मन आत्मनो देहादीन्सृज।
ति तच्च मनो माया सृजति ततो मायाद्युपाधिसमुदायात् ६ एतदेव सदृष्टान्तमाह सार्द्धेन स्नेहेति
दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानी
यो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसारः इति योऽन्यो देहकृतः देहबंधनः य

इत्यादिरूपोऽयमात्मनः तत्त्वतः ॥ १ ॥

अतोदीपवत्तेसारएवतुपश्यति नत्वात्मान्योतिवदित्याह नेति ननुतत्त्वमसीत्यमानः आत्माकुतइत्यतआ
ह यदिति यात्मस्वात्मयोस्थूलसूक्ष्मयोपरः अन्यपतः स्वयंज्योतिः परत्वमेपचपश्यति आकाशइवेति
आधारोदेहादेः प्रपंचस्यप्रभवोनिर्विकारः नास्यतउपमाचपस्मोनंतोपमः ततोविभुः ८ अतस्त्वमे
वचिंतयेत्याह एवमिति आत्मस्थदेहाद्युपाधिस्थितेन आत्मनाविचारयअनुमानगर्भिण्या दृष्टदृश्याव

ततश्चात्मास्वयंज्योतिः योव्यक्ताव्यक्तयोपरः आकाशइवचाधारोप्रभवोनंतोपमस्ततः
८ एवमात्मानमात्मस्थमात्मनैवाश्रयप्रभो बुद्ध्यानुमानगर्भिण्यावासुदेवानुचिंतय
९ चोदितोविप्रवाक्येनतत्त्वंपश्यतितत्त्वकः मृत्यवोनोपयस्यंतिमृत्यूनांमृत्युमीश्वरं
१० अहंब्रह्मपरंधाम ब्रह्माहंपरमंपदं एवंसमीक्षन्नात्मानमात्मन्याधायनिष्कले ११

यव्यतिरेकयुक्त्या ९ एवंचसतितत्त्वोततकोनस्यदेहदित्याह चोदितइति तत्रदेहतवः मृत्यवइ
त्मिमृत्युदेहतवः १० विमर्शप्रकारंदर्शयन् ततःकार्यंदर्शयेदर्शयति द्वाभ्यां योहंसब्रह्मैव यद्ब्र
ह्मतदहमेवेतिसमीक्षन्नित्याह ब्रह्मेति भावनयाजीवस्यकोशादिनिवृत्तिः ब्रह्माहमिति भाव १८
नयाचब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीतिव्यतिरेकोदर्शितः निष्कलनिरुपाधौआत्मनिब्रह्मणि ११

18A

विषयुक्तैराननैर्दंशंतं प्रमंतं तक्षकं लेलिहानं सर्पं यद्वा लेलिहानं जिह्वाभिरोष्ठप्रांतं सृक्किणी आस्वादयंतं
ग्रात्मनः पृथक् १२ हरेश्चेष्टामात्मनयत्वंपृष्टवानसि तदेतन्मतेकथितं तथापि छम्यक्तोयत्नापीतंनास्यशृच्छसि
किमिति १३ इतिभावार्थेद्वादशेपंचमोध्यायः ५ षष्ठेपरीक्षितोमोक्षः सर्पहोमादिनस्तुतान् वेदशाखावि
भागोक्तोविविद्व्यासवर्णितः १ एतन्पुराणानिशम्यनिखिलात्माहरिलपश्यति निखिलेचात्मनिपश्यतीति

दंशंतं तक्षकं पादे लेलिहानं विषाननैः नद्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः १२ एतत्ते कथितं
तात यद्यात्मा पृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि १३ इति श्रीभागवते द्वाद
शस्कंधे पंचमोध्यायः ५ सूत उवाच एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखि
लात्मदृशा समेन तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धांजलिस्तमिदमाह स विष्णुरातः १ रा
तेपिवंत २५ हृन्मयमुखविलोचनांबुजेचप्रोत्फुल्लानि तानि यस्य सः अद्भुतभाव अत्याश्चर्यं तद्रूपं तेन अंश्च
कितापिप्रष्टु पुरः प्रसमासमीपगतः २६ ॥ ० ॥

३६

36B

अत इदं जगत् यथा पुरा प्रलयात् पूर्वं तथा संविन्यस्तं दृष्ट्वा अतीव विस्मितः सन्नभ्रमत् २७ कृत्स्नशो ददर्शेत्य-
पश्यति द्वाभ्यामित्यादिना ककुभो दिशः पुराणि आकरान् खेटान् कर्षकग्रामान् व्रजान् गोकुलानि आ-
श्रमान् आश्रमवर्णान् अनेषां वृत्तीश्चेत्यर्थः २८ नानायुगानि कल्पांश्च कल्पयति नैवी कल्प्यते इति तथा अनेकान्
तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तः शरीरं मशको यथाविशत् तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो
यथा पुरा मुह्यदतीव विस्मितः ३० क्षितिं दमिं भगणान् अद्रीन् सागरान् द्वीपान् सवर्षान् ककुभः सुरासु-
रान् वनानि देशान् सरितः पुराकरान् खेटान् व्रजान् आश्रमवर्णवृत्तयः २९ महान्ति भूतान्यथ
भौतिकान्यसौ कालं च नानायुगकल्पकल्पनं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवा-
वभासितं २९ हिमालयं पुष्पभद्राचलां नदीं निजाश्रमं यत्र ऋषीनपश्यत विश्वं विपश्यञ्छ्वसि-
ताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ३० तस्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं
तं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरीक्षणेन ३१ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठि-
तं हृदि परमार्थं यदेवात्मवभासितं तदेवेव ३१ तदेति । तं हृदि अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं
ततो कं वीक्ष्य तत्प्रेमसुधास्मितेन युक्तेनापाङ्गनिरीक्षणेन निरीक्षितः सन् ३१ ३२ अथ तं बाल-
कमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः कथंभूतं नेत्राभ्यां हृदि धिष्ठितम् ३२ ॥

37

भा०द्वा०
टी०
१०

तावृषिरिङ्गितज्ञस्तत्राभासर्वमेवसुषेलसंज्ञावर्द्धितोवभूवतदुग्रमवैफल्पेरष्टांतः अनीशोनिर्देवः तेननिर्मितांई।
हाक्रीडायचेति ३३ तमन्तर्हितंभगवंतेमनुवदः सलिललोकसंप्लवस्तिरोधापितुन्तर्हितः सचसाश्रमएव
यथापूर्वंस्थितइति ३४ इतिभावार्थेनवमः ९ दशमेशिवप्रागानमुनिस्तुष्टोवरानदात् तेनसाकमतिश्री
वासमभाषमभाजयत् १ तेनकाशयन्तानवन्मकाशमानयात्वइनेनविनाविहासोपिपरस्तेनवमायया

तावदभ्भावाभ्यासाद्योगाधीयोगरहाशयः अंतर्दधे सुधे सघोयथेदानीं निर्मिता ३३ तमन्वथव
रोबह्मसलिलंलोकसंप्लवः तिरोधापितादमस्वाश्रमेपूर्ववास्थितः ३४ इतिश्रीभागवतेद्वादशेन
वमः ९ सूतउ० सएवमनुभूयेदंनारायणविनिर्मितं वैभवंयोगमायायास्तमेवशरणंययौ १ मार्क
ण्डेयउ० प्रपन्नोस्म्यङ्घ्रिमूलंतेप्रपन्नाभयदंहरे यन्माययापिविबुधामुह्यन्तिज्ञानकाशया सूतउ० त
२ मेवंनिभृतात्मानंवृषेणदिविपर्यटन् रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः २ अथोमामभिवीक्ष्य
गिरिशःसमभाषत पश्येमंभगवन्विप्रंनिभृतात्मेन्द्रियाशयं ३ निभृतोदझषव्रातोवातापायेयथार्ण
वः कुर्वस्यतपसःसाक्षात्सं

तानितोवमित्यहंकारेणमप्रयत्नीत्यर्थः २ श्रीनारायणएवस्वमायादर्शन
ञ्चातश्रीशिवरूपेणसांत्वयामासेत्याह तमेवमित्यादिना निभृतात्मानंसमाधिनाविनेरुद्राण्याभवान्या
१ निभृतानिश्चलाआत्मेन्द्रियाशयाः देहेन्द्रियमनांसियस्यतंभूतंनिश्चलमुदकंझषव्रातपक्षिन्सः ससिद्धिफ

सिद्धिंसिद्धिदोभवेत्

[illegible]

37A आशिषः अभ्युदयताम् उमविदज्ञहेतुः भक्तिमिति ६ संवदिष्यामः संवादं करिष्यामः सात्वतां गतिं
हेतुः ईशानइति ८ रुद्राधिष्ठितः करणास्पदत्वेनयोयेनसः ९ १० नकेवलंवदिष्ये आत्मन्यपिआमशि
ववि वदिषुविस्मितः कथमयंसहसास्मत्कस्मादेवहृदिभाति कथंभूतंनतडिद्दृढिप्रियंगगनदाधारयन्ती
श्रीभगवानुवाच नैवेच्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत भक्तिंपरांभगवतिलब्धवान्पुरुषे
व्यये ६ अथापिसंवदिष्यामोभवान्येतेनसाधुना अयंहिपरमोलाभोनृणांसाधुसमागमः ७
सूतउवाच इत्युक्त्वातमुपेयायभगवान्ससतांपतिः ईशानःसर्वविद्यानामीश्वरःसर्वदेहिनां
८ तयोरागमनंसाक्षादीशयोर्जगदात्मनोः नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच ९ भगवां
स्तदभिज्ञायगिरिशोयोगमायया आविशत्तद्गुहाकाशंवायुश्छिद्रमिवेश्वरः १० आत्मन्यपिशि
वंप्राप्तंतडित्पिङ्गजटाधरम् त्र्यक्षंदशभुजंप्रांशुमुद्यन्तमिवभास्करं ११ व्याघ्रचर्माम्बरंशूलधनुरि
ष्वसिचर्मभिः अक्षमालाडमरुककपालंपरशुंसह बिभ्राणंसहसाभातंविचक्ष्यहृदिविस्मितः
१२ किमिदंकुतएवेतिसमाधेर्विरतोमुनिः नेत्रेउन्मील्यददृशेसगणंसोमयागतम् १३
तिलयानं शीघ्रदीप्तिरुपस्थितम् १० शूलादिभिःसहाक्षमालादीन्बिभ्राणमित्यन्वयः अक्षमालादीनां
द्वैका ११ विस्मयपूर्वकंतद्दर्शनमाह किमिदमिति सोमया उमया सहागतंरुद्रंददर्श १२ ॥

38

भा.ढा. तैतेननाम १४ पूर्णकाममत्वेवानतिं येनत्वयाजगन्निर्वृत्तंभवतीतितत्रया १५ निर्गुणत्वेनत्रिगुणत्वे
ही. नचनमस्करोति नमःशिवायैनैर्गुण्यायसत्वायसत्वाधिष्ठात्रे अतएवमृडयतीतितत्रयानमस्ते १६ नोस्मनः
२२ वयः ब्रह्मविस्मुमदेश्वराः यतयेभ्यः तेवयं १७ वरदानादिनाभवन्तेवेवास्माभिःक्रियतेतन्नशदः।

हंदेत्रिलोकैकगुरुंननामशिरसामुनिः तस्मैसपर्य्योवदृथात्मगणायमहेमयो १४ स्वागता
मनपाद्यार्थ्यगंधस्रग्धूपदीपकैः आद्दवाल्मानुभावेनपूर्णकामस्यतेविभो १५ कस्त्वामकिमी
यानेयेनेदंनिर्वृतंजगत नमःशिवायशान्तायसत्वायप्रमृडायच रजोजुषेथघोरायनम
स्तुभ्यंतमोजुषे १६ सूतउवाच एवंस्तुतःसभगवानादिदेवसतांगतिः परितुष्टःप्रसन्नात्मा
प्रहसन्तमभाषत १७ श्रीभगवानुवाच वरंवृणीध्वनःकामवरदेशावरंत्रयः अमोघदर्शनं।
येषामत्योयद्धृदितेमृत १८ ब्राह्मणाःसाधवःशान्तानिःसंगाभूतवत्सलाः एकांतभक्तास्मास्म
निर्वैरासमदर्शिनः १९ सलोकालोकपालास्तान्वदन्त्यर्चन्त्युपासते अहंचभगवान्ब्रह्मसचापिह
रिरीश्वरः २० ॥

जगदेवयत्नाइववनामितिब्राह्मणांस्तौति ब्राह्मणाइत्यादिना साधवःसदाचाराःशान्ताः मत्सरादिर
हिताः निःसंगाःनिष्कामाः १९ नकेवलंतएव किंच अहंचेत्यादिना २० ॥ ३८

भूत्यनमनैवैहं त्वनरमाद नेति अग्रणावपि श्रवणमात्रमपि च तत्तेपश्यंतितेनतस्मात् एवंभूतानुगुणान् ईमहि
भजेम २१ ब्राह्मणेभ्यः ब्राह्मणान् आत्मसमाधानं चित्तैकाग्र्यं तपः आलोचनं स्वाध्यायः स्वशाखा
ध्ययनं संयमः वागादिनियमास्तैः २३ किंच श्रवणादित्यादि २४ चंद्रललामोपभूषणायस्य तस्य

नतेमयाच्युतेनेच भिदामात्मेपि च त्यते नात्मनश्च जनस्यापि तद्गुणान्वयमीमहि २१ नह्यस्मया
नितीर्थानि न देवाश्चेतनोज्झिताः ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः २२ ब्राह्मणेभ्यो नमस्या
मो येस्मद्रूपं त्रयीमयं बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापि महा
पातकिनोपि वः शुद्ध्येरंत्यन्त्यजाश्चापि किमु संभाषणादिभिः २४ सूत उवाच इति चंद्रलला
मस्य धर्मगुह्योपबृंहितं वचोमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् २५ स चिरं मायया वि
ष्णोर्भ्रामितः कर्षितो भृशं शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २६ ऋषिरुवाच अहो ई
श्वरचर्येयं दुर्विभाव्या शरीरिणां यन्नमंतीशितव्यानि स्तुवंति जगदीश्वरः २७

धर्मरहस्ययुक्तं अमृतास्यदं वचः कर्णाभ्यां पिबन्नातृप्यत् अलमिति नामन्यत कर्णयोरमृतायनमि
तिवालयः २५ शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुंजो यस्य सः २६ ईशलीला दुर्विभाव्या अवतनोषि यद्य
दीशितव्यानि स्वनियम्यानि भूतानि जगदीश्वराः स्वयं नमंति स्तुवंति चेति २७ ॥

39

भा॰टी॰ ग्रथवालोकसंग्रहमात्रमेतदित्याह धर्मानिति प्रवक्तारोपि वक्तस्वयं देहिनां धर्ममाचरति १६ नन्वेतत्तस्वभा
२९ वतिरस्कारः कथमयाक्रियतेनत्याह नेति एतावतालोकसंग्रहमात्रेणैव गंभनाद्दिभिः कथंभूतैः स्वमायामा
यीपृतिर्यदुषुतैः भगवतोमापिनस्तवानुभावोनवुध्यतेयतः प्रसिद्धस्यमायिनः कुहकककपटपथानयेतानित्वा
मनादीति यतस्तस्यातत्साक्षाद्रकेनात्मानुभावाडुध्यतदत्तितद्वते प्रबुध्यतेतिपाठेनकास्यदृष्टानेवुधाः १७
धर्मप्राहपितैप्रायः प्रवक्ताद्यमूदेहिनां आचरन्ननुमोदंतेक्रियमाणस्तवैतिच १८ नैतावताभगव
तः स्वमायामयवृत्तिभिः नदुह्यतानभावैर्मोपितः कुहकंयथा १९ सदृक्दमनसाविस्वमात्मना।
नुप्रविश्यपयः गुणैः कुर्वद्भिराभातिकर्तेवतस्वमदृगयथा २० तस्मिनमोभगवतेत्रिगुणायगुणात्म
ने केवलायाद्वितीयायपगुरवेव्रह्मसूतेये २१ कृष्णोनपरोभूमनत्वंरत्वद्दशादर्शनान् यद्दर्शना
णांकामैः सत्यकामः पुमान्भवेत २२ तवैकं कृष्णया पिशणाकामाभिवर्षणात् भगवन्यचु
तेमकिं तन्मरेषुतयाल्वपि २३ सूतउवाच इत्यविनोभिष्टुतमुनिनासूक्तयागिरा तमाहभग
मायाचेष्टितप्रपंचयति सष्टेति स्वप्रदृगयथेत्यविद्याचेष्टितेद्र वाङ्छवैः शर्ववयाचाभिनंदितः २४
ष्टानः त्रिगुणात्वपिनत्रीवनदभिष्टुताय किंतुगुणानामात्मनेनियंत्रे वरंवृणीष्वेति यदुक्तेनत्याह कामि
ति वरदर्शनेयस्य तस्मात्तनः परंकन्तुवरंवृणीयस्य नवदर्शनात्सर्वाणकामः सर्वानंदसंदोहरूपः स ॥२९॥
त्यकामः पयोदकामानसर्वानंदः २५ वरदानायस्वयमेवप्रवृत्तः शर्ववयाअस्याचाभिनंदितःस्मनुमोदि।

श्री रामः

का मोक्षमेवापि अन्यत्र सर्वपुण्यपदाः इत्यादि ब्रह्मवर्चस्विनस्त्वं भूयादित्युक्तेर्गुणा न वयः यत तत्त्वमधोक्षजे भक्तिमान् ३६
तस्यै कर्म तत्पत्न्यादि मुनेः पुरानुभूतं च भगवन्मायावैभवं तच्च कथयन् ३८ अवाप्तो महायोगमहिमा येन सः ३९ ए
तन्मार्कण्डेयस्य चरितं तेनानुभूतं च भगवन्मायावैभवं तेन वर्णितं ४० नन्वेमण्यस्त्कुलोत्पन्नस्याप्यस्य सप्तक
ल्पायुषश्च हेतुचामानोक्तिंद्रुमेवतत्राह एतन्मार्कण्डेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं कादाचित्क

कामश्चेयं महर्षेस्तु भक्तिमांस्त्वमधोक्षजे आकल्पान्ताद्यशः पुण्यमजरामरता तथा ३६ ज्ञानं त्रैकालिक
ब्रह्मन्विज्ञानं च विरक्तिमत् ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ३७ सूत उ॰ एवं वरान्स मुन
येदत्त्वागात्त्र्यक्ष ईश्वरः देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ३८ सोप्यवाप्तो महायोगमहिमा भार्गवो
त्तमः विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः ३९ अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः अनुभूतं भग
वतो मायावैभवमद्भुतं ४० एतत्केचिदविद्वांसो मायासंसृतिमात्मनः अनाद्यावर्तितं नृणां कादाचि
त्कं प्रचक्षते ४१ य एवमेतद्भृगुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितं संश्रावयेत्संशृणुयादु तावु
भौ तयोर्न कर्माशयसंसृतिर्भवेत् ४२ इति श्रीभागवते द्वादशस्कन्धे दशमः १०

ईश्वरेच्छया न सैवाकलि
केनेत्तत्सर्वं मायारचितं ततः केचिदनादि बहुकालमावर्तितं देवपुरामहरस्वद्यमानेन पुनः परिवर्तितं च तत
नैकेते नृणां संसृतिः सर्गप्रलयादिलक्षणा अस्मात्मनो भगवतो मायेत्यच समचिद्धामतस्तु मायाधीशोः स्वोस्मीत्युक्ताः।
त्मायमत हत्वमस्तुदरप्रवेशनिर्गमतः सप्तकल्पलत्तणमात्रेणेति यत्नोऽनविरोध इत्यर्थः ४१ संशृणुयादुत

संस्थावयेत वा कर्मवासनाकृता संसृतिर्न भवेदिति ४१ इति द्वादशे दशमः १०

40

भा॰ द्वा॰ एकादशे तु पूजार्थं महापुरुषवर्णनं रवेर्व्यूहस्य चाख्यानं प्रतिमासं पृथक्कृतं १ येनामर्त्यत्वमाप्नोति म
र्त्योऽस्मै भगवते नमः तंत्रोक्तं निक्रियायोगमंगोपांगादिकल्पितं २ अथेति हे भार्गव यतो भवान्समस्तत
टी॰ त्रराद्धांते तत्त्ववित् १ पृष्टमाह तांत्रिका इति परिचर्यायां उपासनायां विषये केवलस्य चैतन्यघनस्य
८॰ अंगानि पादादीनि उपांगानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयस्तेषां हृदेका
शौनक उवाच अथेममर्थं पृच्छामो भवंतं बहुवित्तमं समस्ततंत्रराद्धांते भगवान्भार्गव तत्त्ववित्
१ तांत्रिकाः परिचर्यायां केवलस्य श्रियःपतेः अंगोपांगायुधाकल्पं कल्पयंति यथा च यैः २ त
न्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां ३ सूत उवाच नम
स्कृत्वा गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ४ मायाद्यैर्न
वभिस्तत्त्वैः सविकारमयो विराट् निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ५ तद्यथा कल्पयंति यैश्च त
त्त्वैः कल्पयंति तन्नो वर्णयेति ३ गुरूपदेशागम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह नमस्कृत्वेति वि
भूतीः विग्रहाद्याः अंगादिकल्पनाभूतादिभिर्दर्शयितुं प्रथमं तावद्यथाकल्पंतीति प्रश्नस्यैव विराड्रूपे
णोत्तरं वक्तुं विराड्विग्रहमाह मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्त्वैः विकारैरेका
दशेंद्रियाणि पंचमहाभूतानीति षोडशात्मको विराट् सः प्रसिद्धो निर्मितः यत्र विराजि सचित्के चेतनाधिष्ठित

कवचनेत्रादयो अंगेनाग्नादिकल्पनानि अस्त्रं इति ५

८॰

50A

एतेनैवपौरुषंरूपंपुरुषस्यवैराजस्यरूपमेवमेवमोक्षेणाधिष्ठितत्वात्तद्भेदविवक्षयातस्यरूपमुच्यते अंगकल्पना
माह भूःपादावित्यादिभिः भूरादयस्तुवादेनुभगवत्पादादिभावनाविधीयते पूजनेनमेदुःखपानःपायुः ७ ८ अ
उक्तमर्थमेवमयमित्याह यावानयंव्यष्टिपुरुषः स्वमानतः सम्वितस्तिसंख्ययावयवसन्निवेशेनमितः
एतद्वैपौरुषंरूपंभूःपादौद्यौशिरोनभः नाभिःसूर्योक्षिणीनासेवायुःकर्णौदिशःप्रभोः ५ प्रजाप
तिःप्रजननमपानोमृत्युरीशितुः तद्बाहवोलोकपालामनश्चन्द्रोभ्रुवोयमः ६ लज्जोत्तरोधरोलोभो
दंतोज्योत्स्नास्मयोभ्रमः रोमाणिभूरुहाभूम्नोमेघाःपुरुषमूर्धजाः ७ यावानयंवैपुरुषोयावत्यास
स्थयामितः तावानसावपिमहापुरुषोलोकसंस्थया ८ कौस्तुभव्यपदेशेनस्वात्मज्योतिर्बिभर्त्य
जः तत्प्रभाव्यापिनीसाक्षाच्छ्रीवत्समुरसाविभुः ९ स्वमायांवनमालाख्यांनानागुणमयींदध
त् वासश्छंदोमयंपीतंब्रह्मसूत्रंत्रिवृत्स्वरं १० विभर्तिसांख्ययोगंचदेवोमकरकुंडले मौलिंपदंपा
रमेष्ठ्यंसर्वलोकाभयंकरं ११ अव्याकृतमनंताख्यमासनंयदधिष्ठित धर्मज्ञानादिभिर्युक्तंसत्व
पद्ममिहोच्यते १२ ओजःसहोबलयुतंमुख्यतत्वंगदांदधत् अपांतत्वंदरवरंतेजस्तत्वंसुदर्शनं १३
भूषणादीन्याह कौस्तुभेत्यादिना स्वात्मज्योतिःशुद्धजीवचैतन्यंयान्तस्यकौस्तुभस्यप्रभानामेवश्रीव
त्सविभर्ति ९ त्रिवृत्स्वरं प्रणवं १० पारमेष्ठ्यंपदंब्रह्मलोकं ११ अव्याकृतंप्रधानं यत अधिष्ठितो
अधिष्ठितः अधिष्ठियस्थितः तदासनंरूपं पद्मंसत्वं तच्चोक्तः १२ मुख्यतत्वंप्राणतत्वंप्राणोवैमुख्य इतिश्रु

41

भा॰ द्वा॰ टी॰ ८१

आकूतीः क्रियाशक्तियुक्तं मनः अथास्याभिव्यक्तिः बहिरभिव्यक्तं रूपं मुद्रयार्थतयास्यार्थक्रियात्मतां वरदाभ
यदादिरूपत्वविभक्तिं तत्तन्मुद्रयात्तयात्तयाभावयेदित्यर्थः १६ मंडलं देवयजनं भूमिं सूर्यमंडलत्वेन भावये
दित्यर्थः अन्तर्वेदिं मंडलं वा दीक्षा संस्कार आत्मनः गुरुकृतां मंत्रदीक्षामेव आत्मनः संस्कृतायोग्यताभावये
दित्यर्थः परिचर्येति भगवतस्तावत् परिचर्या स्वस्य सकलपापक्षयायैवरूपाभावयेदित्यर्थः १७ एवमास

नभो निभं नभस्त्वमसि चर्मतमोमयं कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं १५ इं
द्रियाणि शरानाहुराकूतीरस्यस्यन्दनं तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां १६
मंडलं देवयजनं दीक्षासंस्कार आत्मनः परिचर्या भगवत आत्मनो दुरितक्षयः १७ भग
वान्भगशब्दार्थं लीलाकमलमुद्वहन् धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् १८ आ
तपत्रं तु वैकुंठं द्विजा धामाकुतोभयं त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम् १९ ॥

तपद्ममुक्ते इदानीं स्वस्य पद्ममाह भगवानिति भगवच्छब्दार्थं ऐश्वर्यादिषाड्गुण्यं १८ हे द्विजाः ए
कवचनान्तोऽयं पाठः अकुतोभयं कैवल्यधामातपत्रत्वेन भजत यद्वा वैकुंठस्य विशेषणं अकुतोभयं
यद्वा मेति विवृतं ऋग्यजुः सामरूपो वेदः सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिर इत्यादिमंत्रलिंगात् यज्ञं
यज्ञस्वरूपं पुरुषम् यज्ञो वै विष्णुरिति श्रुतेः १९ ॥ ०

८१

अनपायिनी हरेः शक्तिः तत्त्वहेतुः सतात्मनः स्वस्वरूपस्य चिद्रूपत्वात् तस्यास्तस्मै हार्दिन्यर्थः तच्चमूर्तिः पंचरा
त्रागमरूपः योगिनामाद्योऽष्टौ गुणास्ते हरेर्द्वास्था नंदादयः २० तस्यैव चतुर्व्यूहोपासनामाह वासुदेवादिश
दैः पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदरूपास्य इत्यभिधीयते २१ तस्यैवाध्यात्मनि चतुर्व्यूहोपासनामाह
स एव भगवान् विश्वादिवैर्वृत्तिभिः जाग्रदवस्थाभिः परिभाव्यते तद्दूत्त्वपयाधीनाह अर्था वाह्याः इति

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः विष्वक्सेनस्तन्त्रमूर्तिर्विदितः पार्षदाधिपः
२० नंदादयोऽष्टौ द्वास्थाश्च तेऽणिमाद्या हरेर्गुणाः वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं
२१ अनिरुद्ध इति ब्रह्मन् मूर्तिव्यूहोऽभिधीयते स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः
अर्थेन्द्रियाशयज्ञानैर्भगवान् परिभाव्यते २२ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं वि
भर्ति स्म चतुर्मूर्तिर्भगवान् हरिरी

श्वेमनः आराधनमुभयं संज्ञा रूपकमत्तावेष्टितय सात्वितैः २२
उक्तं चतुर्व्यूहरूपो वासुदेवादिरूपोऽस्मै गायुपासनमाह अंगेति अंगादिभिरुपलक्षितो भगवान् हरिर्वा
सुदेवादिचतुर्मूर्तिः सन् विश्वादिचतुष्टयं विभर्ति स्म विश्वादिभावेऽपि तन्नियन्तृत्वस्य न जीवत्वमित्याह
विश्वादिचतुष्टयं विभ्रदपि भगवानीश्वर एवेति २३ ॥

४२

भा.द्वा. तस्य ब्रह्मादिविभूतिं नामाह द्विजऋषभेति स एष एव भगवान् ऋषयोर्वेदस्य कारणमित्यादि रेवं चयं पवस्तुनोभेद।
टी. भावे पि च स्वगतमायया सृजति हरति पातीति कृत्वा ग्राख्यया ब्रह्मादिरूपया मुनावृतावृतः सूनाक्षुन्नतानो।
४२ पि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु सत्यमिति न अत्र विद्वदनुभवप्रमाणमाह यतस्तत्परैरात्मत्वेनैव ल-
भ्यत इति २४ यमेवमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते कृष्णसखवृष्ण्यृषभेत्यस्य सखे वृष्णिः श्रेष्ठश्च वनिद्रु।

द्विजऋषभः स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् सृजति हरति
पातीत्याख्ययानावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः २४ श्रीकृष्ण कृष्णसख वृष्ण्य-
र्षभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्र-
वः श्रवणमंगल पाहि भृत्यान् २५ य इदं कल्य उत्थाय महापुरुषलक्षणं तच्चित्तः प्रयतो।

होरेराजन्याः तेषां वंशस्य दहन अनपवर्गमप्रतीतं वीर्यं यस्य \ जप्त्वा ब्रह्म वेद गुहाशयम् २६
गोपवनितानां व्रजाः समूहाः भृत्या नारदादयः तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं य-
स्य २५ एतज्जपमात्रस्यापि विशिष्टज्ञानफलमित्याह य इति कल्ये उषःकाले यस्तच्चित्तः प्रयतः गु। ४२
विश्वस जन्मा गुहाशय हृदिस्थं ब्रह्म प्रपद्यति २६ ॥०

५२A मेरुलं देवयजनं निम्नत्वात्तु दिमागतः मूर्तिस्थ इष्टप्रसंगेन रविमुहोत्तरपश्चात्ते १ मुकरति एवमेयदाह
तया वाच स्मृथयोगं धर्मा स्मरसेनागा ग्रामणीयोयानुयानादेवाः इत्येकेकशो गणाः समेत्यादिनो सोरः स्मृथसंव
यी समानागणाः २० तेषां समानामधीश्वरैः तत्र तिमिः तत्र न्मासासाधिकृतसूर्यैर्वा वाह इह विभागे २१ तद्वता
वद्भूयनिरूपयितं प्रथमं सूर्यस्वरूपमाह ग्रनाद्यविद्यया मायया प्रय सूर्यः लोकनेत्रः लोकयात्राप्रवर्त्तं।
शौनक उवाच प्रकोयदाह भगवान्विस्मृतानाद्यसूर्य एव ते सोरोगणो मासिमासि नानावसतिसमकः
२७ तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ब्रूहि नः श्रद्धधानानां व्यूहं सूर्यात्मनो हरेः २८ सूत
उ० ग्रनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां निर्मितो लोकतंत्रोयं लोकेषु परिवर्त्तते २९ एक एव
हि लोकानां सूर्यआत्मादिकृद्धरिः सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ३० कालो देशः क्रि।
कः २९ ग्रनन्तस्य क्रिया। या कर्ता करणं कार्यमागमः द्रव्यं फलमिति ब्रह्मन्नवधोक्तोजया हरिः ३१
मेदोपाधिकमेव नानात्वं तत्त्वतः इत्याह एक एवेति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः जगदात्मा आ
दिकृत् सृष्टिकर्ता हरिरेव सूर्यः स च सर्वासां वैदिकक्रियाणां मूलमनेन नोपाधिना बहुधोक्तः ३० कालइ
प्रथगुणाद्धरेरष्टादशादित्यरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधाभेद
माह कालइति कालः प्रातरादिः देशः समादिः क्रिया अनुष्ठानं कर्ता ब्रह्मणादिः करणं स्त्रुगादिः

कार्यपद्धतिः प्रमाणतः मेनादि दुःखं च वीप्सादिफलं स्वर्गादि ५८

53

भा॰द्वा॰ टी॰ ५३

तत्कालरूपधारी भगवान् पृथक् चरति मध्वादिषु चैत्रादिषु लोकयात्रानिर्वाहाय ३२ तानेव गणानाह धा
तेति द्वादशभिः धाता सूर्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिर्नागः रथकृत्‌यक्षः पुलस्त्य ऋषिः तुंबु
रुर्गंधर्वः ३३ अर्यमा सूर्यः पुलह ऋषिः अथौजा यक्षः प्रहेती राक्षसः नारदो गंधर्वः कच्छनीरो नागः पुं
जिकस्थली अप्सराः माधवे वैशाखे ३४ मित्रः सूर्यः अत्रिर्ऋषिः पौरुषेयो राक्षसः रथस्वनो यक्षः तक्ष

मध्वादिषु द्वादशसु भगवान्कालरूपधृक् लोकतन्त्राय चरति पृथग्द्वादशभिर्गणैः ३२ धाता कृत।
स्थली हेतिर्वासुकी रथकृन्मुने पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ३३ अर्यमा पुलहोथौजाः।
प्रहेतिपुंजिकस्थली नारदः कच्छनीरश्च नयन्त्येते स्म माधवं ३४ मित्रोत्रिपौरुषेयोथतक्षको मेन
काहहाः रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ३५ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः शु
र क्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ३६ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः प्रम्लोचा राक्षसो व
र्यो नभोमासं नयन्त्यमी ३७ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः अनुम्लोचा शंखपालो नभस्या।
ख्यं नयन्त्यमी ३८

कोनागः मेनकाप्सराः हाहागंधर्वः शुक्रमासं ज्येष्ठमासं नयंत्यनुवर्तयंति ३५ वारुणः सूर्यः वसिष्ठ ऋ
षिः रंभाप्सराः सहजन्यो यक्षः हूहूर्गंधर्वः शुक्रो नागः चित्रस्वनो राक्षसः शुचिमासमाषाढं ३६ इंद्रः
सूर्यः विश्वावसुर्गंधर्वः श्रोता यक्षः एलापत्रो नागः वर्यो राक्षसः इति स्वयमेव व्याख्यातं अंगिरा ऋषिः
प्रम्लोचाप्सराः नभोमासं श्रावणं ३७ विवस्वान्सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्षसः आसारणो यक्षः
भृगुऋषिः अनुम्लोचाप्सराः शंखपालो नागः नभस्याख्ये भाद्रपदे ३८

५३

43A विवस्वान्सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुऋषिः अनुम्लोचाप्सराः शंखपालो ना
गः नभस्याख्ये भाद्रपदे ३८ धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः पूषा सूर्यः सुरुचिर्यक्षः घृताची
अप्सराः गौतमऋषिः तपोमासमाद्यमासक्रमात्तिलखने कौमोत्कादिव्यक्रमानुसारेण वैश्वेन मासक्रमे
णेवोक्तिः कविनाम व्यत्ययस्तु कल्पभेदेन निर्णेयः ३९ क्रतुर्यक्षः वर्चा राक्षसः पर्जन्यः सूर्यः सेनजित्

विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः अनुम्लोचाः शंखपालो नभस्याख्यं नयन्त्यमी ३८ पूषा धनंज
यो वातः सुषेणः सुरुचिस्तथा घृताची गौतमश्चेति तपोमासं नयन्त्यमी ३९ क्रतुर्वर्चा भरद्वाजः पर्ज
न्यः सेनजित्तथा विश्वैरावतश्चैव तपस्याख्यं नयन्त्यमी ४० अथांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्व
शी विद्युच्छत्रुर्महाशंखः सहोमासं नयन्त्यमी ४० भगः स्फूर्जोऽरिष्टनेमिरूर्णायुश्चायुपञ्चमः कर्को
टकः पूर्वचित्तिः पौषमासं नयन्त्यमी ४१ त्वष्टा ऋचीकतनयः कंबलाश्वतिलोत्तमा ब्रह्मापेतोऽथ ऋतजि

प्सराः विश्वो गंधर्वः ऐरावतो नागः भरद्वाजऋषिः तपस्याख्ये फाल्गुने ४० द्धृतराष्ट्रश्च सप्तमाः ४२
अंशुः सूर्यः अस्तुरतिपादः कश्यपऋषिः तार्क्ष्यो यक्षः ऋतसेनो गंधर्वः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः
महाशंखो नागः सहोमासमार्गशीर्ष ४० भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गंधर्वः पूर्वचित्तिः अप्सराः
ऊर्णायुर्यक्षः आयुर्ऋषिः कर्कोटको नागः पौषः ४१ त्वष्टा सूर्यः ऋचीकतनयो जमदग्निः ऋषिः कंबलाश्वो
नागः तिलोत्तमाप्सराः ब्रह्मापेतो राक्षसः शतजिद्यक्षः धृतराष्ट्रो गंधर्वः इषभराः माघस्य पालकाः ४२ ॥

44

भा॰द्वा॰ विष्णुरादित्यः अश्वतरोनागः रंभाप्सरा सूर्यवर्चागंधर्वः सत्यजिद्यक्षः मखापेतराक्षसः विश्वामित्रऋषि
टी॰ र्ज्जेमासकार्त्तिके ५४ एतेचादित्यादयःकौर्मेविभज्योक्ताः धातार्यमाचमित्रश्चवरुणश्चेंद्रएवच विवस्वान्
५५ थपूषाचपर्जन्यश्चांशुर्भगस्त्वष्टाथविष्णुश्चआदित्याद्वादशस्मृताः १ पुलस्त्यःपुलहश्चात्रिर्वसिष्ठो
थांगिराभृगुः गौतमोथभरद्वाजःकश्यपःक्रतुरेवच २ जमदग्निःकौशिकश्चमुनयोब्रह्मवादिनः रथकृद्
ग्रामण्यौरिष्टनेमिर्ग्रामण्योस्वरथस्वनः रथचित्रस्वनःश्रोताप्सरणःसोमजित्तथा तार्क्ष्यश्चारिष्टनेमिश्चसेनजिच्च
नजित्तथा एतेयक्षाःसमाख्यातानामभिर्द्वादशैवते अथहेतिप्रहेतिश्चपौरुषेयोवधस्तथा वधोव्याघ्रा

विष्णुरश्वतरोरंभासूर्यवर्चाश्चसत्यजित् विश्वामित्रोमखापेतऊर्जेमासंनयंत्यमी ५४ ॥

नाभगवतोविष्णोरादित्यस्यविभूतयः स्मरतांसंध्ययोर्नृणांहरंत्यंहोदिनेदिने ५५ ॥

स्थापश्चवायुर्विद्युद्दिवाकरः ब्रह्मापेतश्चविप्रेंद्रयज्ञापेतश्चराक्षसाः ६ वासुकिःकच्छनीरश्चतक्षकःस
र्पपुंगवः एलापत्रःशंखपालस्तथैरावतसंज्ञितः ७ धनंजयोमहापद्मस्तथाकर्कोटकोद्विजाः कंबलाश्व
तरश्चैवबहंत्येवयथाक्रमं ८ तुंबुरुर्नारदोहाहाहूहूर्विश्वावसुस्तथा उग्रसेनोवसुरुचिर्विश्वावसुरथा
परः ९ चित्रसेनस्तथागोपुर्धृतराष्ट्रोद्विजोत्तमाः सूर्यवर्चाद्वादशैतेगंधर्वागायनांवराः १० क्रतुस्थला
प्सरोवर्यातथान्यापुंजिकस्थली मेनकासहजन्याचप्रम्लोचाचद्विजोत्तमाः अनुम्लोचाघृताचीचविश्वा ५५
चीचोर्वशीतथा अन्याचपूर्वचित्तिःस्यादन्याचैवतिलोत्तमा रंभाचेतिद्विजश्रेष्ठास्तथैवाप्सरसःस्मृताः इति ५५

५५ब तेषां रथक्रमेणाभिनिरूपयति द्वादशस्वपीति त्रिभिः अयमेको देवः सूर्य्यः षड्भिः गंधर्वादिभिः अस्य जनस्य
मतान्वुवन् प्रभामतिं तनुते गायत्र्यादीनेन सूचितः ४५ तल्लिंगैः सूर्यप्रकाशैः ४६ उन्नह्यंति दृढं बध्नंति
ग्रामण्यायत्ताः नैर्ऋता राक्षसाः ४७ किंच वालखिल्या इति पतेशतानि मासं तत एव विभुं स्तुवंति ४८ व्यूह्य विभज्य

द्वादशस्वपि मासेषु देवोसौ षड्भिरस्य वै चरन्समंतात्तनुते परत्रेह च सन्मतिं ४५ सामर्ग्यजुर्भिस्तल्लिंगै
रृषयः संस्तुवंत्यमुं गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोग्रतः ४६ उन्नह्यंति रथं नागा ग्रामण्यो रथ
योजकाः चोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ४७ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोमलाः
पुरतोभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ४८ एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः कल्पे क
ल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ४९ इति श्रीभागवते द्वादशस्कंधे एकादशोध्यायः ११ सूत उ
वाच नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् १

इति भावार्थे एकादशः ११ द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः प्रथमस्कंधमारभ्य प्राधान्येन समास
तः तदेवमस्मिन्पुराणोक्तानर्थान्संक्षेपतो वर्णयिष्यन् धर्मादीन्प्रणमति नम इति महते हरिभक्ति
लक्षणाय ब्राह्मणेभ्यः ब्राह्मणान्नमस्कृत्य सनातनान्धर्मान्निरूपणलक्षणपुराणोक्तार्थान्वा १ ॥

45

भा॰ द्वा॰
टी॰
४५

पुरुषत्वे उचितं श्रवणादियोग्यं २ एतत्प्रपंचयति अत्रेति भगवानैश्वर्यादिषड्गुणः साक्षात्संकीर्तित इ
तिदेवताकांडार्थः ३ ब्रह्मकांडार्थमाह अत्रब्रह्मेति गुह्यमिति गुणप्रभवाप्ययं प्रभवत्यस्मादिति प्रभवं अप्ये
त्यस्मिन्नित्यप्ययं तत्त्वं च अनेनाश्रयपदार्थो दर्शितः विज्ञानसंयुतं अपरोक्षं ज्ञानं परं तज्ज्ञानेन तदुपा।

एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं २
अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः नारायणो हृषीकेशो भगवान्सात्वतां पतिः
३ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ४
भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं पारीक्षितमुपाख्यानं नारदाख्यानमेव च ५

ख्यानं तत्तज्ज्ञानस्य याख्यायते येन तत्तज्ज्ञानसाधनमित्यर्थः कर्मकांडार्थमाह भक्तियोगश्च साध्य
साधनरूपः तदाश्रयं भक्तियोगेन निष्पादितम् एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्था
नतुक्रामति पारीक्षितमुपाख्यानं परीक्षितजन्मादि तत्प्रस्तावाय नारदाख्यानं च ५ ॥ ॥ ४५

ब्रह्मर्षिर्वा ब्राह्मणो नमस्य इति प्रथमस्कंधार्थः १ उत्क्रांतिरर्चिरादिगतिः प्राधानिकः प्रधानकार्यं चिद्रूपः स्वयग्रा
तः स्थादिनः महदादिक्रमेणेत्यर्थः इति द्वितीयस्कंधार्थः २ महापुरुषसंस्थितिः प्रलये तल्लीमवस्थानं ३
प्राकृतिकः प्रकृतिभवो गुणात्तो भद्रूपः वैकृतिका महदादयः चकाराद्विकाराश्च यत्न योत्सेषा च सर्गः ४ ग

प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः शुकस्यैव ब्रह्मर्षेः संवादश्च परीक्षितः ६ योगधारणयो
त्क्रांतिः संवादो नारदाजयोः अवतारानुगीतं च सर्गो प्राधानिकोग्रतः ७ विदुरोद्धवसंवादः क्षत्तृमैत्रे
ययोस्ततः पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ८ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये
ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ९ कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः भवउद्धरणेऽंभो
धेर्हिरण्याक्षवधो यथा १० ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च अर्द्धनारीनरस्याथ यतः स्वायं
भुवो मनुः ११ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः १२
अवतारो भगवतः कपिलस्य महात्मनः देवहूत्याश्च संवादः कपिलेन च धीमता १३ नवब्रह्मसमुत्प
त्तिर्दक्षयज्ञविनाशनं ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः १४ ॥

तिः स्वरूपं उद्धरणे उद्धारणे १० अर्द्धाभ्यां नारीनरस्य ११ संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्या
नंतरं दृश्यम् १२ १३ चतुर्थस्कंधार्थमाह नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः १४ ॥ ०

46
भा॰द्वा॰ पुंचमस्कंधार्थमाह ततः प्रियव्रतस्य चरितं १५ द्वीपाद्युपवर्णनेत्रयंमसंतेपतः तत्तोयादीनां ये गिरयो नद्य।
टी॰ स्तेनपाम्नुपवर्णनं पातालनरकादीनां च स्थितिः मूनेनैव नरकनिवर्तकमजामिलोपाख्यानमाहेति ततः प।
५६ नारदस्य च संवादस्ततः प्रियव्रतं द्विज नाभेस्ततोनुचरितमृषभस्य भरतस्य च १५ ततो द्वीपसमुद्रादिवर्षन
द्युपवर्णनं ज्योतिश्चक्रसमस्थानं पातालनरकस्थितिः १६ दक्षजन्मप्रचेताभ्यस्तत्पुत्रीणां च संततिः
यतो देवासुरनरास्तिर्यङ्नगखगादयः १७ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः दैत्येश्वरस्य चरितम
प्रह्रादस्य महात्मनः १८ मन्वन्तरानुचरितं गजेन्द्रस्य विमोक्षणं मन्वन्तरावताराश्च विष्णोर्हयशिरादयः १९
कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां २० देवासुरमहायु
द्धं राजवंशानुकीर्तनं इक्ष्वाकुजन्मतद्वंशः सुद्युम्नस्य महात्मनः २१ इलोपाख्यानमेवोक्तं तारोपा।
ख्यानमेव च सूर्यवंशानुकथनं शशादाद्या नृगादयः २२ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः
खट्वांगस्य च मान्धातुः सौभरेः सगरस्य च २३ रामस्य कोशलेन्द्रस्य चरितं किल्बिषापहं निमेरंगपरि षस्यच २५
त्यागो जनकानां च संभवः २४ रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः ऐलस्य सोमवंशस्य ययातेर्नहु
राचीनं १६ षष्ठार्थमाह दक्षजन्मेति सप्तमार्थमाह पुत्रयोश्चेति १८ अष्टमार्थमाह मन्वन्तरानुचरितमिति
कवितकस्य विदङ्गति र्युल्कमोक्षित्र मल्लिरमकाउक्लत्वेनेति इष्टव्यं १९ नवमार्थमाह राजवंशेति

२-२१ सोमवंशादिभूतैः ऐलस्य चरितं २२ २५

तन्नन्नमाभीष्ठ्म २६ २७ दशमार्थमार तस्य कर्माणीति पूतनायाग्रसस्तदिनस्य स्तन्यपयसः पानेस्पर्द्ध
देहेयंतेर्भरत्नस्यापिशांतनोमलन्तनस्यच यया तेर्न्येष्पपुत्रस्य यदोर्वंशानुकीर्तने २६ यत्रावनीर्णोभग
वानकृत्स्नात्योजगदीश्वरः वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले २७ तस्य कर्माण्युदाराणि विजि
तान्यसुरद्विषः पूतनासुपयःपानेशाकटोच्चाटनेशिशोः २८ तृणावर्तस्यनिष्पेषणमर्थेवृवकवा
त्सयोः धेनुकस्यसरम्भ्रातुः प्रलंवस्य चसंतयः २९ गोपानांचपरित्राणं दावाग्नेःपरिसर्पतः द
मनंकालियस्याहेर्महाहेर्नंदमोक्षणं ३० व्रतचर्यातुकन्यानांयत्रतुष्टोऽच्युतोव्रतैः प्रसादोयज्ञ
पत्नीभ्योविप्राणांचानुतापनं ३१ गोवर्द्धनोद्धारणंचशक्रस्यसुरभेरथ यज्ञाभिषेकंकृष्णस्य
स्त्रीभिःक्रीडाचरात्रिषु ३२ शंखचूडस्यदुर्बुद्धेर्वधोरिष्टस्यकेशिनः अक्रूरागमनंपश्चात्प्रस्था
नंरामकृष्णयोः ३३ व्रजस्त्रीणांविलापश्चमथुरालोकनंततः गजमुष्टिकचाणूरकंसादीनांतथा
वधः ३४ मृतस्यानयनंसूनोःपुनःसांदीपनेर्गुरोः मथुरायांनिवसतायदुचक्रस्ययत्प्रियं ३५
कृतमुद्धवरामाभ्यांयुतेनहरिणाद्विजाः जरासंधसमानीतसैन्यस्यबहुशोवधः ३६ घातनंया
वनेन्द्रस्यकुशस्थल्यानिवेशनं आदानंपारिजातस्यसुधर्मायाःसुरालयात् रुक्मिण्याहरणंयु
द्धे ... समस्तवेश्म ३८ यज्ञाभिषेकयज्ञः प्रजाप्रभिषेकस्यतयोर्द्वेद्वेकौ १० ३९ द्विषतः शत्रून्प्रमथ्य ४०

४७

भा॰द्वा॰ टी॰ ४०

३८ ये चैवं गोवर्धनादयस्तेषां ३९ माहात्म्यप्रभावः ४० एकादशार्थमाह विप्रशापेति धर्मविनिर्णयः वर्णाश्र
मधर्मनिश्चयः ४१ मर्त्यपरित्यागः मनुष्यत्वस्यात्यहनं ४२ द्वादशार्थमाह युगेति युगलक्षणानन्त
रं वृत्तिश्चेत्यर्थः त्रिविधा प्राकृतिकनैमित्तिकानित्या चेति ४३ ऋषेर्व्यासस्य सूर्यस्य च विन्यास इत्या

हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनं प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ३८ चैद्यपौण्ड्र
शाल्वानां दन्तवक्रस्य दुर्मतेः शम्बरो द्विविदः पीठो मुरः पञ्चजनादयः ३९ माहात्म्यं च वधस्ते
षां वाराणस्याश्च दाहनं भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान् ४० विप्रशापापदेशेन संहारः
स्वकुलस्य च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मवि
निर्णयः ततो मर्त्यपरित्याग आत्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्च कलौ नॄणामुपप्ल
वः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः शाखाप्र
णयनमृषेर्मार्कण्डेयस्य सत्कथा ४४ महापुरुषविन्यासः सूर्यस्य जगदात्मनः इति चोक्तं द्विजश्रेष्ठ

यत्पृष्टोहमिहास्मि वः लीलावतारकर्माणि कीर्तितानीह सर्वशः ४५

र्थः ४४ इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्पृष्टोस्मि तदुक्तमिति किमेवं नानार्थक
थनेनेत्यत आह लीलेति सर्वशः तत्तत्तदर्थकीर्तनेन द्वारेणेत्यर्थः ४५ ॥ ०

४७A

तत्कीर्तनेनापि किमित्यपेक्षायां तत्फलमाह द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु आर्तः दुः
खितः क्षुत्वा क्षुतं कृत्वा विवशो ऽपि ४८ संकीर्त्यमानः यद्वा श्रुतो ऽनुभावो यस्य सः पुंसां चित्तं प्रविश्य निःशे
षं व्यसनं विधुनोतीति नीरीति सनामनुभवश्रवणमात्राय अर्को गिरिगुहाध्वान्तं न निवर्तयतीत्यपरितोषात् दृष्टान्ता
न्तरमाह अतिवातो ऽभ्रमिवेति ४९ हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपं

पतितः स्खलितो वार्तः क्षुत्वा वा विवशो गृणन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात्
४८ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्य
शेषं यथा तमो ऽर्को ऽभ्रमिवातिवातः ४९ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भ
गवानधोक्षजः तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ५० तदेव रम्यं रु
चिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकय
शो ऽनुगीयते ५१

चयति मृषा गिर इति चतुर्भिः मृषा गिरः मिथ्या वाचः असतीः असत्यः असत्कथा यास्ताः यत् यासु
उत्तमश्लोकस्य यशो ऽनुगीयते ऽनियत तदेव सत्यं तदेव हि मंगलं हि इति निर्देशे भगवद्गुणानामभ्युदयो
यस्मात् तत् नवं नवं यथा भवति तथा रुचिरं रुचिप्रदम् महोत्सवो यस्मात् ५१ ॥

48

भा॰ द्वा॰ टी॰ ४८ चित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तथा न हरेर्यशो न गृणीत न वर्णयेत् तत् ध्वांक्षतीर्थं काकतु
ल्यानां रमणस्थानं हंसैस्तु तैर्न सेवितं तत्र हेतुः यत्रेति ॥ १० ॥ स वाग्विसर्गः स एव वाक्प्रयोगः जन
तानामघसंप्लवः जनसमूहस्य पापनाशकः यस्मान्नाम्नेव बद्धे येकीर्तनानामानि शृण्वन्ति श्रोतारः सन्ति गायन्ति गायकाः सन्ति वाचित
स्वयमेव गृणन्ति ॥ ११ ॥ इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवादरः कर्तव्य इत्याह नैष्कर्म्यमित्यादि नैष्कर्म्यं ब्रह्म तत्।

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्त
त्र हि साधवोऽमलाः ॥ १० ॥ स वाग्विसर्गो जनताघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनन्त
स्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ११ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते
ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यनुत्तमं ॥ १२ ॥ यशःश्रियामेव प
रिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्ह

काशकं तज्ज्ञानं यतो यतो निरंजनं उपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेत् न शोभते नापरोक्षत्वायालं भवती
त्यर्थः ईश्वरे न चेदर्पितं तर्हि यदप्यनुत्तमं सर्वोत्तमं तदपि पुनः कुतः शोभते यतः शश्वत् साधनकाले फलकाले च अ
भद्रं दुःखात्मकं ॥ १२ ॥ किं च वर्णाश्रमाचारादिषु यः परो महान्परिश्रमः स यशःश्रुतानां श्रियामेव कीर्तिः ४८
संपत्तिश्च केवलं न परमपुरुषार्थ इत्यर्थः गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरपि विस्मृतिर्भवति ॥ १३ ॥

ततः किमित्यतस्याह प्रविश्यतीरीति तत्तोऽतिनाशयति ५५ अथ ये दैनीयोऽतनात्मावे चाभिनंदत्वाह यथमिति
हाभ्या द्वेद्विजाग्र्याः शौनकाद्यः यथस्मादात्मभ्यतः कारणोश्रीनारायणोस्माविवेशयशास्वद्वजन्मभावोनायोलो
२ अतोभूरिभागाः वद्भुभाग्याः कथंभूतेनाविलात्मभूतेन सर्वांतर्यामिणा अतएवदेवसर्वोपास्य अदेवनदेवो
प्रविश्यतिः कृत्स्नपदार्थविद्ययोः तत्तोऽन्यभद्राणिशमंततोतिच सत्वस्यशुद्धिपरमांचभक्तिर्ज्ञानंचवि
ज्ञानविरागमुक्त ५५ यूयंद्विजाग्र्याश्वतभूरिभागायच्छश्वदात्मन्यविलात्मभूते नारायणेदेवमदे
वमीशमजस्रभावाद्धजनाविवेशय ५६ अहंचसंस्मारितआत्मतत्वस्कन्दपुराणेपरमर्षिवक्त्रात प्रा
योपवेशेन्नृपतेः परीक्षितः सदस्यृषीणांमहतांचशृण्वतां ५७ एतद्वः कथितं विप्राः कथनीयोरुक
र्मणः माहात्म्यंवासुदेवस्य सर्वाशुभविनाशनं ५८ यएवंश्रावयेन्नित्यंयामक्षणमनन्यधीः श्रद्धा
वान्योनुशृणुयात्पुनात्यात्मानमेवसः ५९ द्वादश्यामेकादश्यांवाशृण्वन्नायुष्यवान्भवेत् पठत्यनश्न
न्प्रयतस्ततोभवत्यपातकी ६० पुष्करेमथुरायांचद्वारवत्यांयतात्मवान् उपोष्यसंहितामेतांपठित्वाप्र
चोतेभयात् ६१ देवतामुनयः सिद्धाः पितरोमनवोनृपाः यच्छंतिकामान्गृणतःशृण्वतोयस्यकीर्त
नात् ६२ ऋचोयजूंषिसामानिद्विजोधीत्यानुविंदते मधुकुल्याघृतकुल्याःपयःकुल्याश्चतत्फलं ६३
योगमाते ज्ञानंईप्सा यहद्यस्माद्यशेभूरिभागाः तपआदिसंपन्नाः ततोनारायणंभजतेतिविधिः ५५ सेमयाकृतं
६० एतस्यपुराणकीर्तनादिफलप्रपंचयितुमाह एतद्विप्रभिः ५७ यामंक्षणंचेतनधीः आत्मानमेवसात्पुनाति

सितनुसातादिवृहत्समाजं ५८ ५९ सत्तायंसितहिनोमधुकल्पा
सिवतृसंदिवसंदिवविनतापविताप्रविशमसि ६३

भा॰ द्वा॰
टी॰
५९

किं च प्रोक्तमिति ६४ राजन्य उदधिमेखलां पृथ्वीं प्राप्नुयादित्यर्थः ६५ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह क
लिमलानां संहतिं समूहं कालयति विनाशयतीति तथा उत्तरत्र ग्रन्थान्तरे ६६ शास्त्रप्रतिपादितं भगवन्तं नमस्करो
ति तमिति द्वाभ्यां जगदुदयस्थितिसंयमात्मनो रजआदयः शक्तयो यस्य तं द्युपतिभिर्देवैः दुरवसितः अज्ञातः
स्तवः स्तोत्रं यस्य तं ६७ उपचिताभिरुत्कृष्टाभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्म

पुराणसंहितामेतामधीत्य प्रयतो द्विजः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६४ विप्रोऽधीत्याप्नु
यात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ६५ कलिमलसंहति।
कालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्र
म सङ्गैः ६६ तमहमजमनन्तमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दु
रवसितस्तवमच्युतं नतोऽस्मि ६७ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजङ्गमालयाय भग
वत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६८ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभा।
वोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं।

न्येवोपरचिताः स्थिरजङ्गमा आलया यस्य तस्मै भगवते ६८ श्रीगुरुं नम \ व्यासस्नुं नतोऽस्मि ६९ इति श्री
स्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यस्मिन् भावो यस्य स तथाप्यजितस्य रुचि
राभिः लीलाभिः आकृष्टः सारः स्वस्थस्वगतं स्थैर्यं यस्य सः तत्त्वदीपकं परमार्थप्रकाशकं श्रीभागवतं यो

…शो स्कंधे द्वादशोऽध्यायः १२

यतनुत तं नतोऽस्मि इति ६९ इति भावार्थे द्वादशोऽध्यायः १२

४९७ सर्वपुराणसंख्यादीनुपवर्णयिष्यन्ननन्तनिपाद्यदेवं प्रणमति यमिति स्तवैर्वेदैश्च स्तुवन्तं स्तुवन्ति उपनिष
द्भूत्याकारेणनन्वेकदेशत्वेनरोधेतुध्यानेनावस्थितेनविश्वंसलनतद्गतेनयन्मनसा तेनयस्यान्तं नविदुः सुरासुरगणाः १ ह्री
शेरमयनोदेदुङ्गैपलमेवदर्शयितुंकूर्मावतारमनुस्मारयन्नाशिषंप्रार्थयते पृष्ठेभ्राम्यन् अमन्दोगरिष्ठोमंदर।
गिरिस्तस्य ग्रावाग्रेसिषाम्भ्राणितैः कण्डूयनात् तेनसुखेननिद्रालोः निद्राशीलस्य येश्वासानिलास्तेसंस्कार

यंब्रह्मावरुणेन्द्ररुद्रमरुतःस्तुन्वन्तिदिव्यैःस्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंतियंसामगाः ध्याना
वस्थिततद्गतेनमनसापश्यन्तियंयोगिनोयस्यान्तंनविदुः सुरासुरगणादेवायतस्मैनमः १ पृष्टे।
भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतःश्वासानिलाःपांतुवः य
त्संस्कारकलानुवर्तनवशाद्वेलाः निभेनांभसांयातायातमतंद्रितंजलनिधेर्नाद्यापिविश्राम्य।
ति २ सूतउवाच पुराणसंख्यासंभूतिमस्यवाच्यप्रयोजने दानंदानस्यमाहात्म्यंपाठादेश्चनिबो
धत ३

येषांकलालवलेशाः तदनुवर्तनवशात् जलनिधेरंभसांयातायातंनैवविश्राम्यति ननु समुद्र सं
तोभादेवतत् नसंस्कारवशात् नयोर्द्वलात् तोभमस्य नितिभेननिमित्तेन २ पुराणसंख्यासंभूतिंसमाहारंच
ग्रसानंश्रीभागवतस्यवाच्यं विषयंप्रयोजनंवा दानंदानंच तस्यपाठादेश्चमाहात्म्यंचनिबोधत ३ ॥ ॥

50

भा॰टी॰
टी॰
५०

त्रयोविंशत्त्रयोविंशतिचतुर्विंशतिसहस्राणि शैवकं शिवपुराणं ४ वाह्नेनग्निपुराणं दशपंचसहस्रा
णि चत्वारिशतानि ६ स्कांदशताधिकाशीतिसहस्र ७ सोपर्णंगरुडपुराणं एकोनविंशद्देकोनविंशति ८
महाभारतेऽखिलितिहासः विस्तथमोनरेचेतिहासएवरामायणंमृषिप्रोक्तं काव्यमतः पुराणानां संदोहसमूह।

ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टिच श्रीवैष्णवं त्रयोविंशच्चतुर्विंशानि शैवकं ४ दशाष्टौ श्री
भागवतं नारदं पंचविंशतिः मार्कंडेयं नवाह्नं च दशपंच चतुःशतं ५ चतुर्दश भविष्यं स्यात्त
था पंचशतानि च दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ६ चतुर्विंशति वाराहमेकाशीतिस
हस्रकं स्कांदं शतं तथा चैकं वामनं दश कीर्तिते ७ कौर्म्यं सप्तदश ख्यातं मात्स्यं तत्तु चतुर्द
श एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ८ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः तत्रा
ष्टादशसाहस्रं श्रीभागवतमिष्यते ९ इदं भागवतं पूर्वं ब्रह्मणो नाभिपंकजे स्थिताय भवभी
ताय कारुण्यात्संप्रकाशितं १० आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् हरिलीलाकथाव्राता
मृतानंदितसत्सुरं ११ सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्र

स्वतुलेत्तसंख्याकएव इदानीमस्य वाच्यप्रयोजनादीन्दर्शयितुमाह तत्रेत्यादिना ३ योजनं १२ ५०
९ हरिलीलाकथाव्रातः समूहः स एवामृतं तेनानंदिताः सन्तः सुरा येन तत् ११ तन्निष्ठं तद्विषयं १२

प्रोष्ठपद्यां भाद्रपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनारूढं ११ तदुक्तमेवामृतं तेन तस्य निर्वृतस्य १४
पारमहंस्यपरमहंसैः प्राप्यं नैष्कर्म्यं सर्वकर्मोपरमः भक्त्यान्वित श्रवणादिपरो विमुच्यते १८ १९ श्रीभा
गवतमप्रदाय प्रवर्तकरूपेण भगवद्ध्यानलक्षणमंगलमाचरति कस्मै ब्रह्मणे अतुलः असमः श्रीभागव
प्रोष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ददाति यो भागवतं स याति परमां गतिं १३ राजन्ते तावद
न्यानि पुराणानि सतां गणे यावद्भागवतं नैव श्रूयतेऽमृतसागरं १४ सर्ववेदान्तसारं हि श्रीभागव
तमिष्यते तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् १५ निम्नगानां यथा गंगा देवानामच्युतो य
था वैष्णवानां यथा शंभुः पुराणानामिदं तथा १६ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा तथा
पुराणव्रातानां श्रीमद्भागवतं द्विजाः १७ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्
पारमहंस्यमेकममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् विप
ठन् विचारणपरो भक्त्या विमुच्येन्नरः १८ कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च
नारदाय मुनये कृष्णाय तद्रूपिणा योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं वि
तद्रूपः पुराकल्पादौ तद्रूपेण ब्रह्मरूपेण तद्रूपिणा योगीन्द्राय शुकाय \ शोकममृतं सत्यं परं धीमहि १९
तदात्मना शुकरूपेण तत्त्वं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहि इति गायत्र्येव यथोपक्रममुपसंहरन्नाग

॥ ६ ॥

51

भा॰द्वा॰ तमेवदेवतारूपेणगुरुरूपेणप्रणमति नमइतिद्वाभ्यां ग्रंथव्याख्यानवान् २०। २३ भावार्थदीपिकामे
टी॰ ताभगवद्भक्तवत्सला। श्रीपरानंदपादाब्जभृंगाः श्रीश्रीधरांकुर्वत १ स्वबालचापलालापैः स्वलीलापरि
५५ तितैः प्रीयतांपरमानंदवृंदैः सद्गुरुः स्वयं १ श्रीपरानंदमत्यैतैर्गुह्यभागवतंमया विवृतंतन्मतेने

नमस्तस्मैभगवतेवासुदेवायसाक्षिणे यइदंकृपयाकस्मैव्याचचक्षेमुमुक्षवे २०। योगींद्रायन
मस्तस्मैशुकायब्रह्मरूपिणे संसारसर्पदष्टंयोविष्णुरातममूमुचत् २१ भवेभवेयथाभक्तिः
पादयोस्तवजायते तथाकुरुष्वदेवेशनाथस्त्वंमेयथाप्रभो २२ नामसंकीर्तनंयस्य
सर्वपापप्रणाशनं प्रणामोदुःखशमनस्तंनमामिहरिंपरम् २३ इतिश्रीभागवतेमहापु
राणेअष्टादशसाहस्र्यांसंहितायांद्वादशस्कंधेश्रीशुकपरीक्षित्संवादेत्रयोदशोध्यायः १३ स
माप्तोयंश्रीभागवतशास्त्रं ॥ ॥ श्रीरामकृष्णाभ्यांनमः ॥ ॥

दंनतमन्मतिर्वैभवान् ३ इतिश्रीभावार्थदीपिकायांद्वादशस्कंधेश्रीधरस्वामिविरचितायांत्रयोदशो
ध्यायः १३ मंगलंलेखकानांचपाठकानांचमंगलं मंगलंसर्वलोकानांभूमिपालेचमंगलं ॥
श्रीकृष्णायनमः ॥ ० ॥ समाप्तोयंद्वादशस्कंधः ॥ ०